श्रीमद्विठ्ठलदीक्षितप्रणीता

कुण्डमण्डपसिद्धिः



नवकुण्डीचक्रम्

लेखकः

डॉ० वृन्दावनदाशः

पुस्तकालय
शान्ति कुँज, हरिद्वार

श्रीमद्विट्ठलदीक्षितप्रणीता

कुण्डमण्डपसिद्धिः

क7/33

'सावित्री' व्याख्यासहिता

लेखकः
डॉ॰ वृन्दावनदाशः
प्रवक्ता – पौरोहित्यविभागस्य
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली

मान्यता प्रकाशन
60 - C, मायाकुञ्ज मायापुरी
नवदेहली–110064

प्रकाशक एवं विक्रेता
मान्यता प्रकाशन
60 - C,मायाकुञ्ज,मायापुरी,
नई दिल्ली–110064
दूरभाष : 2540 7546, 93128 39499
E-mail : manyata_prakashan@yahoo.com

ISBN 81–89149–06–7

© सर्वाधिकार लेखकाधीन

प्रथम संस्करण : 2004

मूल्य : 35/–

मुद्रक :
नेशनल मार्किटिंग्स
998, कटरा मंगलसेन
चावड़ी बाजार, दिल्ली–110006
E-mail : rakesh_national @yahoo.com

कम्प्यूटर टंकण : प्रतिभा यादव, 011-26536349

ब्रह्मवर्चस शोध संस्थान
पुस्तकालय
विभाग
शान्ति कुंज, हरिद्वार

समर्पणम्

श्रीमातुः परमानुकम्पया सिद्धेऽयं कुण्डमण्डपसिद्धिः। यज्ञसम्पादनं स्वर्गाद्यभीष्टकामाय कल्पते। यज्ञस्तावत् श्रौतस्मार्तभेदेन द्विविधः। श्रौतयज्ञे वेदिकानिर्माणप्रक्रिया श्रुत्यनुसारिणी तथा स्मार्ते श्रुति—स्मृति—पुराणानुगामिनी भवति। सोऽयं स्मार्तयज्ञः कुण्डमण्डप—माश्रित्य विधीयते। श्रीमद्विट्ठलदीक्षितकृतस्य कुण्डमण्डपसिद्धिरित्यस्य भाषानुवादो विहितः यत्कृपालेशमासाद्य ममेदं कार्यं पूर्णतामगात्, तयोर्निव्याजकरुणापरायणयोः पित्रोः श्रीमत्सावित्रीश्यामसुन्दरदाशाख्ययोः पाणिपल्लवपुटे सश्रद्धं सनति मदीषदायासजन्यां कृतिमिमां समर्पयामि। एतदायासेन लब्धेन तत्प्रसादेन मे सर्वदेवताप्रसादः सुतरां सिद्ध्येत् पितरि प्रीतिमापन्ने प्रीयन्ते सर्वदेवता इति।

पुस्तकालय
विभाग
शान्ति कुंज, हरिद्वार

क्र/२६२

भूमिका

द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति तत्र ऋग्यजुसामाथर्वांगिरसः शिक्षा कल्पो व्याकरणं निरुक्तं च्छंदः ज्योतिषमिति धर्मज्ञानहेतुभूत षडङ्गसहित कर्मकाण्डरूपाऽपरा ब्रह्मज्ञानहेतुभूतोपनिषद्रूपा परा। वेदो हि यज्ञार्थमभिप्रवृत्ता इति लगधाचार्यस्मरणानुसारं वेदस्य मुख्योद्देश्यो यज्ञः। स च द्रव्यं देवतात्यागरूपा विचारमीमांसा। यज्ञस्तु कुण्डमण्डपसिद्धिरूपा साधनाप्रक्रिया। तच्च सम्यग् भूमिपरीक्षण—दिक्साधन—मण्डप—कुण्ड—योनि—नाभि—मेखला—ध्वजस्थापनेनैव ऐहिकामुष्मिकफलदायि भवति। यद्यपि कुण्डनिर्माणप्रसंगः शास्त्रेषु विद्यते तथापि कुत्रापि पूर्णविवरणं न लभ्यते। श्रीमद्भिः विट्ठलदीक्षितैः समग्र कुण्डमण्डपसारभूता कुण्डमण्डपसिद्धिः च्छन्दोबद्धेन सूत्रेण कूटशब्देन विरचिता।

यज्ञार्थमुपयागीभूमिः दहन—खनन—संप्लावनादिभिः परीक्षिताऽस्ति। यज्ञमण्डपस्य दिवारात्रावपि दिक्साधनं सयुक्तिकं विहितमस्ति। मण्डपविषये मण्डपस्य द्वारमुच्चता तथा मण्डपस्थवेदीनां प्रमाणमाग्नेयादिक्रमेण स्तम्भानां रोपणं वलीकाकीलकशिखरफलकानां निरूपणं मण्डपस्य पूर्णतां विदधाति। दिगधिपतीनां ध्वजपताकाऽस्त्राणां वर्णमानस्थितिरोपणविधिनिरूपणं कृतमस्ति। दिशानुक्रमेण नवकुण्डी—पंचकुण्डीक्रमः कुण्डानां फलानि, आहुतिसंख्यामाधारीकृत्य कुण्डानां विस्तारः, कुण्डेषु योनिनाभिमेखलास्थापनं अभीष्टफलदायि

भवति। यत्र कुण्डं नैव क्रियते तत्र स्थण्डिलेन कार्यम्।

आशासे गुणैकग्राहिणां सकलविदुषामनेनांशतोऽपि लाभश्चेत् सफलो मदीय श्रमः। प्रयत्नतः परिशोधितेऽस्मिन् भ्रान्तेः प्रमादात् मुद्रणदोषाद्वा मानवसुलभा दोषाः स्युः। यथामति सुहृद्भिः ग्रहणीयम्।

पूज्यपादानां पितृणां श्रीमत् सावित्री–श्यामसुन्दरदेवशर्मणां चरणरेणुपूतेन हृदयेन विद्वत्कुलपरम्परामाश्रितवता मया श्रीमतां रवीन्द्रनागरमहोदयानां विभुप्रेरणास्रोतसि वहता ग्रन्थास्यास्य विट्ठलदीक्षितकृतस्य कुण्डमण्डपसिद्धेः सावित्रीव्याख्या विदुषां समक्षं सकलजनज्ञानसुलभकर्मप्रवणचेतसा च समर्पिता।

कार्येऽस्मिन् मत्सहधर्मिण्यर्चनायाः सहयोगोऽतुलनीयः। यथावसरं तस्याः साहाय्यं प्रकाशनेऽस्य श्लाघनीयम्। मित्रवर्याणां सुशान्तचक्राणां सहानुभूतिः श्लाघनीया। विद्यापीठस्य प्राकृत भाषाविभागस्यानुसन्धात्रा श्री प्रभातकुमारदासमहोदयेन कृतावस्यां भाषानुवादे महत् साहाय्यं कृतमिति तस्य सुमञ्जुलं भविष्यं कामये।

कृष्णाष्टमी

संवत् २०६१

विदुषां वशंवदः

डॉ॰ वृन्दावनदाशः

विषयानुक्रमणिका

विषय:	पृ. सं.	विषय:	पृ. सं.
मंगलाचरणम्	१	वर्णभेदेन कुण्डक्रम:	२३
वंशपरिचय:	२	नवकुण्डीचक्रम्	२३
हस्तादिमानम्	२	नवकुण्डीफलम्	२४
भूमिपरीक्षा	३	हवनसंख्यया हस्तमानम्	२४
पूर्वपश्चिमसाधनम्	४	हस्तादिक्षेत्रफलचक्रम्	२६
दक्षिणोत्तरसाधनम्	६	कुण्डाषु योनिस्थानम्	२७
रात्रौ पूर्वपश्चिमसाधनम्	७	चतुरस्रसाधनम्	२८
उपायान्तरेणोत्तरदक्षिणसाधनम्	८	योनिकुण्डसाधनम्	२९
चतुष्कोणसाधनम्	९	अर्धचन्द्रसाधनम्	३०
मण्डपोच्चता	१०	त्रिकोणकुण्डसाधनम्	३१
मण्डपप्रमाणम्	१०	वृत्तकुण्डसाधनम्	३२
द्वारस्य वेद्याश्च प्रमाणम्	११	विषमषडस्रसाधनम्	३३
षोडशस्तम्भक्रम:	११	समषडस्रसाधनम्	३४
स्तम्भोपरि वलिका:	१४	पद्मकुण्डसाधनम्	३४
शिखररचना	१४	विषम—अष्टास्रसाधनम्	३६
तोरणद्वाररचना	१५	सम—अष्टास्रसाधनम्	३७
फलक—कीलकमानम्	१६	कुण्डखातमानम्	३७
कीलरोपणम्	१६	अधमादिमेखलापक्ष:	३८
मण्डपरचना	१७	कुण्डमेखलारचना	३९
ध्वजादिमानम्	१८	नाभिरचना	४१
पताकामानम्	१९	योनिरचना	४२
नवकुण्डीक्रम:	२०	अर्कांगुलमेखला	४३
पंचकुण्डीक्रम:	२२	स्थण्डिलप्रकारा:	४३

ब्रह्मवर्चस शोध संस्थान
पुस्तकालय
विभाग
शान्ति कुँज, हरिद्वार
क्र 9/3६८

ॐ

कुण्डमण्डपसिद्धिः

गाढं ध्वान्तमनेकभानुजठरे राजत्कलाधारिणि
प्रोदञ्चच्छफरीयुगं दरदलत्पद्मेऽणुहीरावलिम्।
स्वर्णोत्तुङ्गगिरिद्वयाधरचरीं दीनां कलिन्दात्मजां
पश्याश्चर्यमिदं शिवामिति वदन्स्मेरः शिवः पातु वः।। १।।

आशीर्वादनमस्कारवस्तुनिर्देशभेदतः।
मङ्गलं त्रिविधं प्रोक्तं ग्रन्थादौ तत्सुखावहम्।।

शास्त्रानुसारं सर्वत्र ग्रन्थादौ मङ्गलाचरणं शिष्टाचारानुमितीति श्रुतिसम्मतम्। त्रिविधस्य तस्यैकमतरूपेण आशीर्वादेन मंगलं भवतीत्यत्र सर्वेषां भूतानां रक्षको भगवान् शिवः मातुः पार्वत्याः रूपवर्णनप्रसंगे मंगलमाचरति। अयि प्रिये! पश्याश्चर्यं पश्य, कीदृशम्? अनेकसूर्याणां मध्ये बहलान्धकारम्; कलाधारिणि चन्द्रे चलचञ्चलं मीनयुगलं; विकसिते पद्मे सूक्ष्मां हीरापंक्तिं चोत्तुंगस्वर्णपर्वतयोरधो गच्छन्तीं कृशां यमुनाम्। अत्राशयो यत्—पार्वत्याः मुकुटे शाद्धेभायमानानां सूर्यसममणीनां मध्ये देव्या घनकेशराशि अन्धकारानावहति; मुखचन्द्रे चलचञ्चले अक्षीणि मीनायेते; विकचराजीवमुखे हीरावलिमिव दन्तपंक्तिम्; उत्तुंगकनकगिरिसमं कुचयोर्मध्ये कृशां यमुनाञ्च पश्य। देव्या एवंविधं गूढरूपं प्रदर्शयन् भगवान् शिव अस्मान् सुधीवर्गान् रक्षतु।

शब्दविशेषार्थः— (१) गाढं— घनम्, सान्द्रम्। (२) ध्वान्तं— अन्धकारं। (३) राजत्कलाधारिणि— कलां धारयन् राजते यः,तस्मिन् अर्थात् चन्द्रे। (४) प्रोदञ्चत्—चलचञ्चलम्। (५) आवलिम्— पंक्तिम्, श्रेणीम्। (७) उत्तुंगः— उच्चः, **वर्द्धितः**। (८) दीनां कलिन्दात्मजाम्— दीनां कृशां, कलिन्दो पर्वतः सूर्यो वा, तस्य **आत्मजा** सुता, तां यमुनाम्। (९) पातु—'पा' रक्षणे— रक्षतु।

भगवान् शिव पार्वती जी के गूढ रूप के वर्णन के उद्देश्य से कहते हैं, हे पार्वती! दोखो यह कैसा आश्चर्य है– कि अनेक सूर्यो के बीच में घना अन्धेरा कैसे विराजमान है; अत्यन्त मनोहर पूर्ण चन्द्रमा में लगे हुये दो अतिचञ्चल मच्छलियां शोभायमान हैं; कमल में हीरे की पंक्ति तथा सोने के ऊँचे--ऊँचे दो पर्वतों के मध्य में दुर्बल यमुना किस तरह शोभा बर्द्धक है, अर्थात् इन आश्चर्यो को पार्वती जी में देखकर शिवजी उनका वर्णन करते हैं कि मुकुट में विराजमान अनेक सूर्यों के समान मणियों के प्रकाश में भी तुम्हारे काले घने केश अन्धकार तुल्य है। हे पार्वती! तुम्हारे चांद जैसे मुख में दोनों आँखें मछलियों की तरह शोभायमान हैं। तुम्हारे हँसने से कमलरूपी मुख में दन्तपंक्ति कमल पर हीरे की कनियों की तरह सुशोभित हैं। पर्वत के सुवर्ण शृङ्गों के सदृश तुम्हारे जो स्तन हैं उनके बीच में जो पतली रोई है वह दुर्बल यमुना के सदृश शोभायमान है। इस प्रकार शङ्करजी पार्वती जी के अङ्गों के वर्णन करते हुये हमारी रक्षा करें॥ १॥

कृष्णात्रिगोत्रे नितरां पवित्रे पवित्रकर्माऽजनि बूवशर्मा।
तत्सूनुना बिट्ठलदीक्षितेन विरच्यते मण्डपकुण्डसिद्धिः॥ २॥

सावित्री–अत्यन्तपवित्रतमे कृष्णात्रिगोत्रे पूण्यकर्मा बूवशर्मा अजनि। तत्पुत्रेण विट्ठल दिक्षितेन "कुण्डमण्डपसिद्धिरिति" ग्रंथो नानापुराणस्मृतिपद्धति–तन्त्राण्यनेकानि संगृह्य सकलकुण्डमण्डपविचाराणां सारभूतं कुण्डमण्डपलक्षणं सविस्तरं छन्दोबद्धसूत्रेण विरचितम्।

शब्दविशेषार्थः–(१)गोत्रे– संततिर्गोत्रजननकुलान्यभिजनान्वयौ। वंशोऽन्ववायः सन्तानः, इत्यमरः। (२) सूनुना– पुत्रेण।

अत्यन्त पवित्रतम कृष्णात्रिगोत्र में पूण्यशाली बूवशर्मा ने जन्म लिया। उनके सुपुत्र विट्ठलदीक्षित ने नाना पुराण, स्मृतिपद्धति, तन्त्रावलियों का सारभूत इस कुण्डमण्डपसिद्धि नामक ग्रन्थ की रचना की॥२॥

कृतोर्ध्वबाहोः समभूर्गतस्य कर्त्तुः शरांशः प्रपदोच्छ्रितस्य।
यो वा सहस्तोऽस्य जिनांशकोऽपि स्यादङ्गुलं तत्तदिभांशका ये॥ ३॥

यवो यूका च लिक्षा च बालाग्रं चैवमादयः।
कृतमुष्टिः करो रत्निररत्निरकनिष्ठिकः॥ ४॥

सावित्री— हस्तादिमानमुच्यते। हस्तौ उर्ध्वं कृत्वा समतलभूमिमुपरि दण्डायमानः स्यात्। एतादृशावस्थायां तस्य पादाग्रात् हस्ताग्रपर्यन्तं यो विस्तारः तस्य एकपञ्चमांश एकहस्त परिमाणं भवति। तस्य हस्त परिमाणस्य चतुर्विंशतिभागस्य नाम 'अङ्गुलः'। अङ्गुलस्य अष्टमांशो 'यवः' यवस्य अष्टमांशो 'यूका'। यूकायाराष्टमांशो लिक्षा। लिक्षायाराष्टमाशो 'बालाग्रः'। बद्धमुष्ट्यां हस्तमानं 'रत्निः'। प्रसृतांगुल्यां हस्तमानम् अरत्निरित्येककक्रमो मण्डपमापक्रियायां भवति। **तथा आदित्यपुराणे**—जलान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः। प्रथमं तत्प्रमाणानां व्यसरेणुः प्रचक्षते।। त्र्यसरेणुस्तु विज्ञेयो येऽष्टौ स्युः परमाणवः। त्र्यसरेण्वस्तु ते ह्यष्टौ रथरेणुस्तु संस्मृतः।।

शब्दविशेषार्थः— (१) समभूर्गतस्य— समतलभूप्रदेशस्य। (२) शरांशः— पञ्चमांशः। (३) प्रपदोच्छ्रितस्य— भागस्य, अशंस्य। (४) जिनांशकः— चतुर्विंशत्यंगुलात्मकः।

हस्तादिमान कहते हैं। दोनों हाथ ऊपर उठाकर समतल भूमि पर पैर के अग्रभाग से या पञ्जे के बल खड़े होन से, पादांगुलि से हस्ताग्र तक के विस्तार (लम्बाई) का एक पञ्चमांश एक हाथ कहलाता है। एक हाथ २४ अंगुल; एक अंगुल का आठवाँ हिस्सा यव; यव का आठवाँ हिस्सा यूका; यूका का आठवाँ हिस्सा लिक्षा तथा लिक्षा का आठवाँ हिस्सा बालाग्र होता है। यह मण्डप बनाने के लिए नाप क्रिया का एकक है। कहुनी से वन्दमुट्ठि तक का विस्तार रत्नि; कहुनी से कनिष्ठिका के अग्र तक का विस्तार अरत्नि संज्ञा होती है।। ४।।

ज्ञात्वा पूर्वं धरित्रीं दहनखननसंप्लावनैः संविशोध्य
पश्चात् कृत्वा समानां मुकुरजठरवद्वाचयित्वा द्विजेन्द्रैः।
पुण्याहं कूर्मशेषौ क्षितिमपि कुसुमाद्यैः समाराध्य शुद्धे
वारे तिथ्यां च कुर्यात् सुरपतिककुभः साधनं मण्डपार्थम्।। ५।।

सावित्री — मण्डपनिर्माणाय भूमिपरीक्षा करणीया। वास्तुशास्त्रानुसारेण सा भूमिः यज्ञार्थं योग्या न वेति निर्णेतव्या। योग्याभूमिरुपायत्रयेणैव विशुध्यते। उपायाः यथा— दहन—खनन—संप्लवनानि। आदौ यज्ञोपयुक्तायां भूमेर्दहनं कर्त्तव्यम्। ततः तां भूमिं जानुपर्यन्तं निखनेत्। खननानन्तरं गर्तं जलेन संप्लावयेत्। खनितमृत्तिकां संशोध्य संप्लाविते गर्ते पूरयेत्, येन तन्मण्डलं मुकुरजठरवत् भवेत्। ततः चतुर्भिर्ब्राह्मणैः पुण्याहवाचनं कुर्यात्। यजमानः घण्टानादादिघोषैः शुभावसरे पुण्यतिथौ पञ्चांगशुद्धिदिवसे फलपुष्पादिभिः कश्यपशेषपृथिवीनां पूजनं कृत्वा मण्डपार्थं पूर्वादिदिक्साधनं कुर्यात्।

तथा शारदातिलके– नक्षत्रराशिवाराणामनुकूले शुभेऽहनि। ततो भूमितले शुद्धे तुषाङ्गारविवर्जिते।। पुण्याहं वाचयित्वा तु मण्डप रचयेच्छुभम्।। *भूमिपरीक्षा पञ्चरात्रे*– ततो भूमिं परीक्षेत वास्तुज्ञानविशारदः। स्फुटिता च सशल्या च वल्मीका रोहिणी तथा।। दूरतः परिवर्ज्या भूः कर्त्तुरायुर्धनापहा। ईशकोणप्लवा सा च कर्त्तुः श्रीदा सुनिश्चितम्।। पूर्वप्लवा वृद्धिकरी वरदा तूत्तरा प्लवा। शेषकाष्ठाप्लवा भूमि र्धनायुर्गृहनाशिनी।। ब्राह्मणी घृतगन्धा स्यात् क्षत्रिया रक्तगन्धकृत्। क्षारगन्धा भवेद्वैश्या शूद्रा विट्गन्धिनी क्षितिः।। ब्राह्मणी भूः कुशोपेता क्षत्रिया शरसङ्कुला। कुशकाशाकुला वैश्या शूद्रा सर्वतृणाकुला।। *अनिषिद्धा, यथा कुण्डसर्वस्वे*– सिता पीता तथा रक्ता कृष्णवर्णसमन्विता। स्थिरोदका दृढा स्निग्धा भूमिः सर्वसुखावहा।।

शब्दविशेषार्थः –

(१)संप्लावनम्–जलेन गर्त्तभूमिंपुरयितव्यम्। (२)मुकुरजठर– "मुकुरदर्पणादर्शम्" इत्यमरः। जठरः – मसृणः, चिक्कणः। (३) कूर्मशेषौ – कुर्मः च शेषश्च। कूर्मः– कश्चपः, शेषः– सर्पः। (४) सुरपतिककुभः – सुरपतेः ककुभः, सुरपतिः इन्द्रः, ककुभः दिक् (दिशस्तु ककुभः काष्ठाः आशाश्च हरिताश्च ताः) इत्यमरः, अर्थात्– पूर्वदिक्।

मण्डप और कुण्ड बनाने के लिए पहिले यज्ञोपयोगी भूमि चुनकर, उस भूमि को जलायें, जलाने के पश्चात् जानुमात्र खोदकर मिट्टी को छानें। खोदे हुए गड्ढे में पानी भरकर छनी हुई मिट्टी को गढ्ढे में बराबर भरकर सीसे के समान चिकना बनायें। उस जमीन पर चार ब्राह्मणों से पुण्याहवाचन करायें। यजमान कछुआ, शेष, वाराह तथा पृथिवी का फल, पुष्पादि से पूजन करें। पञ्चाग शुद्धि के अनुसार शुभ वार तथा तिथियों में मण्डप बनाने के लिये पूर्वादि दिशाओं का साधन करें।। ५।।

नृपाङ्गुलैः सम्मितकर्कटेन सूत्रेण वा वृत्तवरं विलिख्य।
रव्यङ्गुलंशङ्कुममुष्यमध्ये निवेशयेत्खाक्षिमिताङ्गुलीभिः।।६।।
चतसृभिश्चाऽपि ऋजूत्तमाभिः संस्पृष्टशीर्षं तु समेषिकाभिः।
तच्छङ्कुभा यत्र विशेदपेयाद्वृत्ते क्रमात् स्तो वरुणेन्द्रकाष्ठे।।७।।

सावित्री– प्राची–साधनम्। नृपाङ्गुलं नाम षोडशाङ्गुलम् (१६)। अनेन षोडशाङ्गुलपरिमितेन व्यासार्द्धेन सूत्रेण परकालेन वा वृत्तमङ्कयेत्। तस्य वृत्तस्य

केन्द्रे रव्यङ्गुलं नाम द्वादशाङ्गुलपरिमितं शङ्कुं निखनेत्। केन्द्रस्थशंकोरुपरिभागं संस्पृश्य वृत्तस्य परिसीमामुपरि चतुर्षु दिक्षु शङ्कुचतुष्टयः स्थापनीयः। दिवसस्य प्रथमे प्रहरे शङ्क्वग्रच्छाया यां दिशं प्रति वृत्तमध्ये निर्दिशति सा पश्चिमेति चिह्नितव्या। तथैव तृतीये प्रहरे शङ्क्वग्रछाया यां दिशं प्रति परिवर्धते सा प्राची दिगिति ज्ञेया।' संख्याप्रसंगे **अङ्कानां वामतो गतिरिति** सर्वत्र अन्वितव्यम्।

शब्दविशेषार्थः— (१) नृपाङ्गुलैः— षोडशांगुलैः। (२) कर्कटेन— परकालेन (कम्पास इत्यनेन)। (३) रव्यङ्गुलं— द्वादशांगुलम् (द्वादशादित्या इति सकाशात्)। (४) शंकुः— कीलकम्। (५) खाक्षिम्— विंशतिसंख्यका। 'ख' इति शून्यः (०), अक्षि तु नयने (२) एवं विंशतिः (२०) भवति। *'अङ्कानां वामतो गतिरिति न्यायेन*। (६) ऋजूत्तमाभिः— सरलैः। (७) संस्पृष्टशीर्ष— शीरः स्पर्शं कृत्वा। (८) समेषिकाभिः— सममापविशिष्टकीलकैः। (९) शंकुभा— शंकोः भा (भ इति छाया ज्ञेया)। (१०) विशेत्— प्रविशति। (११) अपेयात्— मध्यं प्रति। (१२) वरुणेन्द्रकाष्ठे— वरुणेति पश्चिमदिगधिपतिः, तस्मात् पश्चिमदिगिति ज्ञेया। इन्द्रेति पूर्वदिगधिपतिः, तस्मात् पूर्वदिक् ज्ञेया काष्ठेति दिक् च।

पूर्व दिशा का साधन कहते हैं। १६ अंगुल के परकाल से अथवा १६ अंगुल की रस्सी से वृत्त बनायें। उसके बीच में १२ अंगुल का नोकदार कील गाड़ें। उसके सिर पर २० अंगुल की ४ कील चारों दिशा में सीधी रखें। उस लकड़ी की छाया पहिले पहर जिस तरफ से वृत्त में प्रवेश करे वहाँ पर चिह्न दें तथा उसे पश्चिम दिशा जानना। तीसरे पहर छाया जिस स्थान से वृत्त के बाहर निकलती है उसे पूर्व दिशा जानना चाहिए।। ६—७।।

कर्के कीटे गोमृगे यूकया सा द्वाभ्यां चाल्या सिंहकुम्भत्रिकेऽपि।
यां वै काष्ठां भानुमान् याति तस्यां चाल्या द्वन्द्वे कार्मुके चालनं न।।८।।

सावित्री — राशिषु सूर्यस्थितिमनुलक्ष्य सम्यग्—दिङ्निर्धारणं क्रियते। सम्वत्सरे अयनद्वयं भवति। उत्तरायणं दक्षिणायनं चेति। मकरसंक्रान्तेरारभ्य कर्कसंक्रान्तिपर्यन्तं षड्राशिविशिष्टं कालं उत्तरायणं, कर्कसंक्रान्तेरारभ्य मकरसंक्रान्तिपर्यन्तं षड्राशिविशिष्टं कालं दक्षिणायनं चेति कथ्यते। कर्क तथा वृश्चिकराशिस्थस्य सूर्यस्य छाया दक्षिणायने एक—यूका दक्षिणं प्रति, वृष—मकरराशिस्थस्य सूर्यस्य छाया उत्तरायणे एक—यूका उत्तरं प्रति च वर्धितव्या। तथैव कुम्भ—मीन—मेषराशिषु सूर्यस्य छाया उत्तरायणे उत्तरं प्रति द्वे (२) यूके च सिंह—कन्या—तुलाराशिषु सूर्यस्य छाया

दक्षिणायने दक्षिणं प्रति द्वे (२) युके चालनीया। द्वन्दे कार्मुके च सूर्यस्य छाया नैव चाल्यते। अतः द्वन्द्वे 'स्त्रीपुंसमिथुनौ द्वन्द्व' इत्यमरः (मिथुने) सूर्यस्य छाया यत्र निपतति कार्मुके (धनुषि) सूर्यस्य छाया च यत्र निपतति तत्–तत्स्थाने शंकु निखनीतव्यः, तदेव क्रमशः पूर्व–पश्चिमदिगिति ज्ञेयम्।

शब्दविशेषार्थः – (१) कर्के, कीटे, गोमृगे– कर्कराशौ, वृश्चिकराशौ, वृषभराशौ च मकरराशौ। (२) सिंहकुम्भत्रिकेऽपि–अर्थात् सिंहादित्रयं (सिंह–कन्या–तुला–राशयः:), कुम्भादि (कुंभमीनमेषाः)। (३) काष्ठां– दिशम्। (४) भानुमान्– सूर्यः। (५) द्वन्द्वे– मिथुने। (६) कार्मुके– धनुषि।

एक सम्वत्सर में दो अयन होते हैं। उत्तरायण और दक्षिणायन। मकर संक्रांति से कर्क संक्रांति तक छहः राशि उत्तरायण; तथा कर्क संक्रांति से मकर संक्रांति तक छहः राशि के काल को दक्षिणायन कहते हैं। कर्क, वृश्चिक, वृष और मकर इन राशियों के सूर्य में पूर्व दिशा की छाया को जब उत्तरायण सूर्य रहें तो उत्तर की तरफ १ यूका और दक्षिणायन सूर्य हो तो दक्षिण की तरफ १ यूका और सिंह, कन्या, तुला, कुम्भ, मीन और मेष इन राशियों के सूर्य हों तो २ यूका बढ़ायें, अर्थात् उस चिह्न से २ यूका हटकर चिह्न दें। मिथुन और धनु राशि के सूर्य की छाया पर एक–एक कील गाडें, इसे वास्तव में पूर्व पश्चिम जानें (अर्थात् इसमें नहीं चलाना चाहिए)।। ८।।

रज्जुं द्विघ्नां मध्यचिह्नां सपाशां प्राचीशङ्कौ पश्चिमे चाऽपि दत्त्वा।
कर्षेद्धीमान् दक्षिणे चोत्तरे च तच्चिह्ने स्याद्दक्षिणा चोत्तरा दिक्।। ९।।

सावित्री– पूर्व–पश्चिमयोर्साधनानन्तरं, उत्तर–दक्षिणदिशोः साधनविषये सूत्रयति। यथा शङ्कु निखननेन पूर्व–पश्चिमयोः निर्धारणं कृतं तथैव शंकुनिखननेन उत्तर–दक्षिणदिशो निर्धारणमपि करणीयम्। तदुपायस्तु मण्डपमापस्य द्विगुणपरिमितं सूत्रं गृहीत्वा तन्मध्य स्थाने ग्रंथ्येका प्रदेया। तस्य उभयपार्श्वे पाशं दद्यात्। पाशौ पूर्व–पश्चिमस्थशंकोः निवेश्य मध्यग्रंथिमुत्तर–दक्षिणक्रमेण आकर्ष्येत। उत्तरस्यां दिशि परिधिमुपरि यत्र चिह्नो जायते तदुत्तरदिगिति, दक्षिणस्यां च परिधिमुपरि यच्चिह्नो जायते तद्दक्षिणदिगिति सिद्ध्यति।

शब्दविशेषार्थः– (१) द्विघ्नां– द्विगुणितम्। (२) कर्षेत्– आकर्षयेत् (वर्धयेत्)। (३) सपाशां– पाशं ग्रन्थिः, ग्रन्थिना सह। (४) धीमान्– बुद्धिमान्।

उत्तर दक्षिण दिशा का साधन कहते हैं। जैसे पूर्व पश्चिम का साधन कहा गया है उसी प्रकार से उत्तर दक्षिण का साधन करें। जितना बड़ा मण्डप बनाना हो उसकी दूनी रस्सी लें। उसके मध्य में गाँठ दें और दोनों छोर पर फन्दा बना दें। एक फन्दा पूरव की कील में, दूसरा फन्दा पश्चिम की कील में फँसायें। मध्य की गांठ थाम कर बुद्धिमान् पुरुष दक्षिण व उत्तर की तरफ खींचे। जहाँ तक वह रस्सी जाय वहाँ पर एक–एक कील गाड़ दें। इस प्रकार दक्षिण और उत्तर दिशा सिद्ध होती है।।९।।

निशि वा श्रवणोदये दिगैन्द्री गुरुभस्योदयनेऽथ वह्निभस्य।
सुरवर्द्धकिवायुभान्तरालेऽप्यमुतः साधय पूर्ववच्च याम्याम्।। १०।।

सावित्री – दिवा दिङ्निर्धारणोपायवर्णनानन्तरं रात्रावपि तन्निर्धारणोपायस्य वर्णनं क्रियते। रात्रौ यत्र श्रवण–नक्षत्रस्य उदयो भवति वा गुरोः (बृहस्पतेः) भस्य (नक्षत्रस्य) अर्थात् पुष्यनक्षत्रस्य उदयो जायते वा त्रह्नेः (सूर्यस्य) भस्य अर्थात् कृत्तिकानक्षत्रस्य उदयो भवति तत्र पूर्वदिगिति जानीयात्। अथवा चित्रा–स्वातिनक्षत्रयोरन्तराले पूर्वदिगिति वोध्यम्। तथा च पूर्वोक्तेन उपायेन दक्षिणोत्तरयोः साधनं करणीयम्।

नक्षत्राणामधिपतिर्यथा –

अश्वियमदहनकमलजशशिशूलभृददितिजीवफणिपितरः।
योन्यर्यमन्दिनकृत्त्वष्टृपवनशक्राग्निमित्रश्च।।
शक्रोनिर्ऋतिस्तोयं विश्वविरञ्ची हरिर्वसुर्वरुणः।
अजपादोऽहिबृध्नः पूषाचेतीश्वराभानाम्।। (श्रीनिवासदीपिकायां)

शब्दविशेषार्थः– (१) दिगैन्द्री– 'इन्द्रस्य दिक्' इति 'पूर्वदिक्' ज्ञेयम्। (२) गुरुभस्य– गुरूस्तु– बृहस्पतिः, भेति– नक्षत्रम् अर्थात् बृहस्पते नक्षत्रं, अर्थात् पुष्येति वोध्यम्। (३) सुरवर्द्धकि– चित्रेति ज्ञेयम्। (४) वायुभ – स्वातीति ज्ञेयम्। (५) वह्निभ– वह्निः अग्निः, भेति नक्षत्रं, वह्नेः नक्षत्रं कृतिका। (६) याम्याम्– दक्षिणदिगिति। "दिशस्तु आशा–ककुभ काष्ठा हरिताश्च ताः" इत्यमरः।

अथ रात्रि में पूर्व दिशा का साधन कहते हैं। श्रवण, पुष्य व कृत्तिका नक्षत्र जहाँ पर उदय हो वहाँ पूर्व जानना। अथवा चित्रा स्वाती के मध्य में पूर्व दिशा जानना और पूर्वोक्त प्रकार से दक्षिणोत्तर दिशाओं का साधन करें।। १०।।

चित्रा विध्वैकया स्वातीअन्ययाऽपि शलाकया।
तिर्यक्स्थान्तरचिह्नात्तु द्विमूले स्यात् स्फुटेन्द्रदिक्।। ११।।

सावित्री– रात्रौ दिशानिर्धारणस्य उपायान्तरं कथ्यते। चित्रानक्षत्रं परिलक्ष्य सरलरेखानुपातेन भूमौ शंकुमेकं निखनेत्। स्वातीनक्षत्रं च परिलक्ष्य तेनैव प्रकारेण शंकुमेकं भूमौ निखनेत्। शंकुद्वयोः अन्तरालस्य मध्यवर्तीस्थानं पूर्वमिति ज्ञेयम्। अर्थात् चित्रा–स्वातिनक्षत्रयोः अन्तरालः पूर्वमिति सिद्ध्यति।

शब्दविशेषार्थः– (१) विध्वैकया– विध्व+एकया, (एकया शलाकया वेधनमिति ज्ञेयम्)। (२) तिर्यक्स्थान्तरचिह्नात्तुद्विमते– उभयशंकोः तिर्यग्रेखांकने यत्र रखयोः परस्परमिलनं भवति तदेव पूर्वदिगिति सिद्ध्यति। (३) स्फुटेन्द्रदिक् – स्फुटम् इन्द्रस्य दिक्, स्फुटं– स्पष्टम्, इन्द्रस्य दिक्– पूर्वदिगिति।

पूर्वदिक् साधन का दूसरा उपाय कहते हैं। एक शलाका से चित्रा नक्षत्र की तारा को वेधन करें और दूसरी शलाका से स्वाती नक्षत्र की तारा को वेधन करें। फिर मध्य चिह्न से युक्त एक तीसरी शलाका दें और उसके मध्यचिह्न को पूर्व जानें।। ११।।

दिनमानदले सप्तांगुलच्छायाग्रतो हि यत्।
शंकुमूले नीयमानं सूत्रं स्यादुत्तरा दिशा।। १२।।

सावित्री– मध्याह्ने दिशानिर्देशम् मध्याह्न नाम दिनमानदलम्। त्र

शब्दविशेषार्थः – (१) दिनमानदले– मध्याह्ने इति ज्ञेयम्।

दिनमान के दल (मध्याह्न) मे ७ अङ्गुल शङ्कुको गाड़े। जमीन में उस शङ्कु की छाया का अग्र जहाँ आवे वहाँ पर शङ्कु की जड़ से १ रेखा खींचे। वही उत्तर दिशा होती है।। १२।।

परमदिनदिनोद्भवान्तरालं शरगुणितं च हृतं रसैर्द्युतिः स्यात्।
समकुगतनरे नगांगुले त्विट् समगतया स्वभया भवेदुदीची।। १३।।

सावित्री – दिनमानाऽऽधारेण दिशासाधनोपायः कथ्यते। दिक्साधनदिनस्य दिनमानं परमदिनमानात् वियुज्य पञ्चगुनितेन षड्धा हृतेन यो समयो भवति तस्मिन् समये (मध्याह्ने) समतल प्रदेशे (नगांगुल नाम) सप्तांगुलविशिष्टं शंकुं भूमौ निखनेत्। तत्र शंक्वग्रच्छाया यां दिशं निर्दिशति सा उदीची, अपरा दक्षिणेति ज्ञेया।

शब्दविशेषार्थः – (१) परमदिन– सम्वत्सरस्य तद्दिनं यस्य दिनमानं सर्वोच्चो

भवति। (२) रसैर्द्युतिः— रसाः षट्, द्युतिः भागः। (३) नगांगुले— सप्तांगुले। (४) समकुगतनरे— समतलप्रदेशे।

जिस दिन दिशा साधन करना हो उस दिन के दिनमान को परमदिनमान से घटा दें। जो अंक शेष रहे उसको ५ से गुणा कर, उसे ६ से भाग दें तब छाया प्राप्त होती है। (उदाहरण परम दिन ३४/५, दिक् साधन दिवस का दिनमान २५/५५ को परम दिन में घटाया तो ८/१० शेष आया। इसको ५ से गुणा किया तो गुणने पर ४०/५० हुआ। इसको ६ से भाग दिया ६ घटि ४८ पल के समय पर सप्तांमुल विशिष्ट शंकु ज़मीन में गाड़ने से छाया जहाँ पर आये उसके अग्रभाग पर चिह्न करे, वही उत्तर दिशा है। पूर्व पश्चिम पूर्ववत् साधे।। १३।।

दिगन्तशंकुद्वयगं द्विपाशं विस्तारतुल्यं तु गुणं दलांके।
कोणे प्रकर्षेदितिवेदकोणेष्वेवं चतुष्कोणमतीव साधुः।। १४।।

सावित्री — वृत्तोपरि चतुरस्रस्यांकनोपायः। दिशासाधनप्रकरणे वृत्तांकनोपायो विहितः तथा पूर्वादि—चतुर्दिशां निर्णयोऽपि कृतमस्ति। कोणनिर्धारणं—पूर्व—दक्षिणशंकुद्वयमुभयपार्श्वे पाशयुक्तेन मध्ये च ग्रन्थिविशिष्टेन रज्ज्वा संयोजयेत्। ग्रन्थिं च दिशयोः कोणदेशं प्रति प्रकर्षेत्। अनेन प्रकारेण ग्रन्थिः वृत्ताद्बहिर्यत्र स्पृशति तत्रैको शंकुः निखनेत्। तदेव आग्नेय (कोणः) इति ज्ञेयम्। तेनैव प्रकारेण ईशान—वायव्य—नैऋतानां कोणानां निर्द्धारणार्थं पूर्वोत्तरयोः, उत्तर—पश्चिमयोः पश्चिम—दक्षिणयोश्च शंकूनां संयोजनं करणीयम्।

शब्दविशेषार्थः— (१) दलांके— षोडशः। (२) वेदकोणः— चतुष्कोणाः।

वृत्त पर चतुरस्र बनाने की रीति पूर्व, पश्चिम, उत्तर और दक्षिण के क्रम से दो—दो चिह्नों के शङ्कु में १६ हाथ की रस्सी में फन्दा लगायें। पूर्व दक्षिण के शङ्कु में फन्दा लगा कर अग्निकोण की तरफ खींचे फिर दक्षिण पश्चिम के शङ्कु में फन्दा लगाकर वायव्य कोण की तरफ खींचे। फिर उत्तर पूर्व के शङ्कु में फन्दा लगाकर ईशान कोण की तरफ खींचे। इस प्रकार से चौकोण सिद्ध होते हैं।। १४।।

उच्चां भूमिं मण्डपस्य प्रकुर्याद्धस्तोन्मानामर्द्धहस्तोन्मितां वा।
मध्ये भूमिं मण्डपेनोन्मितां च त्यक्त्वा कुर्यान्मण्डपश्चेद् द्वितीयः।। १५।।

सावित्री— मण्डपोच्चता। मण्डपस्य उच्चता सामान्यभूमेः एकहस्त— परिमिता (२४ अं.) वा अर्द्धहस्तपरिमिता (१२ अं.) भवेत्। प्रतिष्ठादिकार्येषु अपरमण्डपनिर्माणं क्रियते। अनयोर्मण्डपद्वयोर्मध्ये प्रथममण्डपस्य भूमेरुच्चता एकहस्तपरिमिता द्वितीयमण्डपस्य अर्द्धहस्तपरिमिता कुर्यात्।

मण्डप की भूमि १ हाथ ऊँची (२४ अं.) अथवा आधा हाथ ऊँची (१२ अं.) बनायें। प्रतिष्ठादि कार्य में दूसरा मण्डप करें। इस मण्डप के अतिरिक्त मण्डप जितना बड़ा हो उतनी जमीन बीच में छोड़कर दूसरा मण्डप बनायें अर्थात् प्रथममण्डप एक हाथ तथा दूसरा मण्डप आधा हाथ बनाना चाहिए।। १५।।

दशसूर्यकरोन्मितोऽधमः स्याद्दिनशक्रमितैश्च करैस्तु मध्यः।
धृतिभूपकरोन्मितो वरीयान्नखहस्तोऽप्यथ मण्डपस्तुलायाम्।। १६।।

सावित्री – वास्तुशास्त्रानुसारेण मण्डपप्रमाणं कथ्यते। मण्डपस्त्रिविधः अधममध्यमोत्तमो भेदात्। दशहस्त–द्वादशहस्तो वा अधमः। द्वादशहस्त श्चतुर्दशहस्तो वा मध्यमः। षोडशहस्ताष्टादशहस्तो वा उत्तमः। विंशतिहस्तप्रमाणमण्डपः तुलादानकाले क्रियते। पञ्चरात्रस्मरणात्– कनीयान् दशहस्तः स्यान्मध्यमो द्वादशोन्मितः। तथा षोडशभिर्हस्तैर्मण्डपस्यादिहोत्तमम्।।

मन्त्रमुक्तावल्याम्– चतुर्विंशद्धस्तपर्यन्तं मण्डपवृद्धिः। *वास्तुशास्त्रे*– पञ्चहस्तादारभ्य द्वात्रिंशद्धस्तपर्यन्तं वृद्धिः। *ब्राह्मणादिवर्णक्रमेण मण्डपप्रमाणं शैवसिद्धान्तशेखरे*– विप्राणां विंशतिर्हस्तो मण्डपस्तु सुशोभनः। कलाहस्तः (१६) क्षत्रियाणां वैश्यानां मीन (१२) हस्तकः। दशहस्तस्तु शूद्राणां हीनानामष्टहस्तकः। *मदनरत्ने*– विप्राणां मण्डपः प्राच्यां राज्ञामीशानकोणतः। विशामुदीच्यां शूद्राणां प्रतीच्यां शस्त ईरितः। वैष्णवो मण्डपः प्राच्यामीशानकोणतः। शाक्तः प्रतीच्यां कौवेय्योमितरेषां सुपर्वणम्। महामण्डपतः प्राच्यामुदीच्यां वा स्नानमण्डपम्। गजहस्तायतिं दीर्घे चतुरस्रं चतुर्दिशम्। वितस्त्युच्छ्रायसहितं चतुर्द्वारोपशोभितम्। मध्ये महामण्डपतो ह्यर्द्धदेशं परित्यजेत्। तन्मध्ये स्थण्डिलं रम्यं हस्तमात्रप्रमाणकम्। चतुरङ्गुलिकोच्छ्रायं त्रितयस्वस्तिकैर्युतम्। *मण्डपस्थलंवास्तुशास्त्रे*– गृहस्योत्तरपूर्वेण प्रागुदक्प्रवणं गृणे। देवतासन्निधौ वाऽपि पुण्यदेशे जलाशये। सुसमे भूमिभागे च कृत्वा हेरम्बपूजनम्। मण्डपं स्थापयेत्तत्र चतुरस्त्रमुदक्प्लवम्।।१६।।

शब्दविशेषार्थः– (१) सूर्यकरोन्मितं– द्वादशहस्तपरिमितम्। (२) अधमः– निम्नमानात्मकम्। (३) दिनशक्रमितैः– दिनेति सूर्यः, द्वादशसूर्याः; शक्रमितैः– शक्रेति इन्द्रः, चतुर्दशेन्द्राः। (४) धृतिभूपकरोन्मितैः– धृति इति अष्टादश। भूपेति षोडशः। (५) नखहस्तः– नखेति विंशतिः।

मण्डप का प्रमाण वास्तुशास्त्रानुसार कहते हैं। दस हाथ व बारह हाथ का मण्डप अधम होता है। बारह हाथ व चौदह हाथ का मण्डप मध्यम होता है।

सोलह हाथ व अठारह हाथ का मण्डप उत्तम होता है। तुलादान में उत्तम मण्डप २० हाथ का होता है और मण्डप की लम्बाई चौड़ाई बराबर है। अर्थात् समान चौकोर मण्डप बनायें।। १६।।

दिगन्तराले द्विकरं भवेद्द्वारचतुष्टयं वेदगजांगुलैस्तत्।
विवर्द्धितं मध्यवरिष्ठयोः स्याद्वेदी त्रिभागेन समाकरोच्चा।। १७।।

सावित्री– मण्डपद्वारप्रमाणम्। मण्डपत्रयाणां चतुर्दिक्षु द्वाराणि भवन्ति। मण्डपानुसारं (द्वारप्रमाणानि भिन्नानि। तथा च उत्तम मण्डपे पञ्चहस्ताष्टां गुलोच्चताविशिष्टं) द्विहस्त–चतुरङ्गुलप्रस्थ प्रमाणं (५ह./२ह. ८अ.) द्वारं भवति। मध्यममण्डपे पञ्चहस्तोच्चताविशिष्टं चतुरंगुलाधिकं द्विहस्तप्रमाणं (५ह./२ह. ४अ.) द्वारं भवति। अधमे मण्डपे तु चतुर्हस्तोच्चताविशिष्टं द्विहस्तप्रस्थपरिमितं (४ह./२ह.) द्वारं भवति।

शब्दविशेषार्थः– (१) द्विकरं– द्विहस्तपरिमितम्। (२) वेदगजांगुलैः– 'वेदः' इति चतुः, गजेति अष्ट। (३) त्रिभागेन– उत्तममण्डपस्य प्रमाणस्य त्रिविभजनमिति। (४) समाकरोच्चा– उच्चता। (५) मध्यवरिष्ठयोः– मध्यममण्डपं चोत्तममण्डपं तयोः।

द्वार प्रमाण कहते हैं। मण्डप की चारों दिशाओं में चार दरवाजे बनने चाहिए। जैसे अधम मण्डप में दरवाजा की चौड़ाई दो हाथ, ऊँचाई ४ हाथ ८ अंगुल होनी चाहिए। मध्यम और उत्तम मण्डप में वेदी को ३ भाग कर अर्थात् १४ हाथ विशिष्ट मण्डप को तीन भाग करने पर ४ हाथ १६ अंगुल ऊँचाई २ हाथ ४ अंगुल चौड़ाई दरवाजा बनाना चाहिए। उत्तम मण्डप में ५ह. ८अं. विशिष्ट दरवाजा बनाना चाहिए।

तुलाप्रदानेऽधममध्ययोः स्यात् सा पञ्चहस्तोत्तमकेऽद्रिहस्त।
ईशानभागे ग्रहवेदिका तु हस्तोन्मितोच्छ्रायवतो त्रिवप्रा।। १८।।

सावित्री– तुलादाने मण्डपस्य मध्यवेदीविशेषता कथ्यते। अधम–मध्यममण्डपयो र्मध्यवेदीस्वरुपं पञ्चहस्तपरिमितं वर्गक्षेत्रं भवति। उत्तममण्डपे तु मध्यवेदी सप्तहस्त–लम्ब–प्रस्थपरिमिता एकहस्तोच्चताविशिष्टा भवति। **ईशाने ग्रहवेदिका** इति सर्वशास्त्रसम्मतम्। एकहस्तपरिमिता लम्बो– च्चताप्रस्थविशिष्टा वेदी त्रिसोपानयुक्ता स्यात्। आग्नेय्यां योगिनी, नैर्ऋते वास्तुवेदी, वायव्ये क्षेत्रपालवेदी ईशाने ग्रहवेदी च करणीयाः। तथा च कर्मविशेषे–'वेदी चतुर्विधा प्रोक्ता चतुरस्रा च पद्मिनी। श्रीधरी

सर्वतोभद्रा दाक्षासु स्थापनादिषु।। चतुरस्रा चतुष्कोणा वेदी सर्वफलप्रदा। तडागादिप्रतिष्ठायां पद्मिनी पद्मसन्निभा। राज्ञां स्यात् सर्वतोभद्रा चतुर्भद्राभिषेचने। विवाहे श्रीधरी वेदी विंशत्यस्रसमन्विता।। दर्पणोदरसङ्काशा निम्नोन्नत विवर्जिता।"

तथा शारदायाम्– आग्नेय्यां योगिनी वेदी वास्तुवेदी तु नैर्ऋते। वायव्ये क्षेत्रपालानाम् ईशाने ग्रहवेदिका।। वप्रप्रमाणम्– द्विरङ्गुलोच्छ्रितोवप्रः प्रथमः समुदाहृतः। त्र्यङ्गुलोच्छ्रायसंयुक्तः वप्रद्वयमथोपरि।। द्वयङ्गुलस्तत्र विस्तारः सर्वेषां कथितो बुधैः।

शब्दविशेषार्थः– (१) अद्रिहस्त– अद्रि पर्वतः, ते च सप्त, अर्थात् सप्तहस्तपरिमिता। (२) हस्तोन्मितोच्छ्रायवता– एकहस्तोच्चता –लम्ब–प्रस्थविशिष्टा। (३) त्रिवप्रा– वप्रेति सोपानम्, त्रिसोपाना।

तुलादान में मध्यवेदी निर्माण कहते हैं। अधम और मध्यम मण्डप में ५ हाथ लम्बी व चौडी, एक हाथ ऊँची बाली मध्यवेदी और उत्तम मण्डप में ७ हाथ की लम्बी व चौड़ी और १ हाथ ऊँची मध्यवेदी बनायें। ईशान कोण में ग्रहवेदी १ हाथ ऊँची १ हाथ चौड़ी व लम्बी तथा तीन सीढ़ी वाली बनानां चाहिए। उसी प्रकार अग्निकोण में योगिनी वेदी नैर्ऋत्य में वास्तुवेदी और वायव्य में क्षेत्रपालवेदी बनायें।। १८।।

समत्रिभागे च सूत्रं प्रदद्यादुदग्दक्षिणं चापि पूर्वापरञ्च।
ततस्त्र्यंशपूर्तौ च कोणेषु दद्यात्समस्तम्भकान्द्वादशैवेषु हस्तान्। १९।
वेद्याः कोणे हस्तिहस्तोच्चवेदस्तम्भान्दद्याद्बहिर्दिक्तः सचूडान्।
प्रादक्षिण्यात्पञ्चमांशं तु भूमौ दद्यादेवं षोडशस्तम्भसंस्था।। २०।।

सावित्री– अथ षोडशस्तम्भस्थापनाविधिः। मण्डपं समत्रिभागं कृत्वा सन्धिस्थानेषु एकमेकं स्तम्भरोपणं कुर्यात्। एवं चतुर्षु दिक्षु कार्या। अनेन द्वादशबहिर्स्तम्भस्थानानि आग्नेयादि क्रमेण निरुप्यन्ते। अर्थात् चतुर्कोणेषु चत्वारि स्तम्भानि चतुर्दिक्षु द्विस्तम्भसंख्यया अष्टस्तम्भानि, एवं संमिल्य वेद्याः परिसीमाक्षेत्रे द्वादशस्तम्भस्थानानि निरुप्यन्ते। दिशां त्रिभागकरणेन मुख्यवेदीमध्ये या अन्तर्वेदी जायते तस्याः चतुर्कोणेष्वपि स्तम्भचतुष्टयं भवति। अनेन षोडशस्तम्भानि भवन्ति।

बहिर्द्वादशस्तम्भानां रोपणविधिः– एतेषामुच्चता पंचहस्तोन्मिता स्यात्। तस्य एकपंचमांश एकहस्तप्रमाणं भवति। रोपणे तदेवांशो भूमिमध अपरचतुरंशो भूमिमुपरि स्युः।

अन्तर्चतुर्स्तम्भानां रोपणविधिः। एतेषामुच्चता अष्टहस्तपरिमिता स्यात्। तस्य एकपंचमांशः १ ह. १४ अं. ७ य. १ यू. परिमितो भवति। रोपणे एतदेवांशो भूमिमध अवशिष्टं भूमिमुपरि स्यात्। एतेषां षोडशस्तम्भानां रोपणं तु आग्नेयादिक्रमेण (प्रदक्षिणाक्रमेण) कुर्यात्।

शारदातिलके– स्तम्भोच्छ्राये शिलान्यासे सूत्रयोजनकीलके। खननावटसंस्कारे प्रारम्भो वह्निगोचरे।। वास्तुशास्त्रे– पञ्चमांशं खनेद् भूमौ सर्वसाधारणो विधिः।।

शब्दविशेषार्थः– (१) उदग्दक्षिणं– उत्तर–दक्षिणौ। (२) पूर्वापरम्– पूर्व–पश्चिमौ। (३) त्र्यंशपूर्तौ– तृतीयांशस्य अन्ते। (४) द्वादशैवेषु– द्वादश + एव + ईषु। 'ईषु' इति पञ्च (वाणाः) (५) हस्तिहस्तोच्च हस्तिहस्त– अष्टहस्तोच्चता। (६) वह्निदिक्तः– आग्नेयकोणादिति। (७) सचूडान्– चूडेन सह, चूड इति अग्रभागः शिखरो वा।

१६ खम्भा गाड़ने की विधि कहते हैं। मण्डप का दक्षिण, उत्तर, पश्चिम और पूर्व दिशाओं को समान तीन–तीन भाग करके सूत्र दें। अग्नि कोण से दक्षिण नैर्ऋत की क्रम से मण्डप के बाहरी हिस्से में बारह तथामण्डप के मध्य चारों चिह्नित स्थान पर चार स्तम्भ गाड़ना। इस प्रकार १६ स्तम्भ गाड़ना चाहिए। बारह स्तम्भ (१२) की ऊँचाई पांच हाथ तथा बीच के चारों स्तम्भों की ऊँचाई ८ हाथ होना चाहिए। स्तम्भ गाड़ने की विधि (पञ्चमांशं खनेत् भूमौ) सर्वसाधारण विधि इस न्याय से बाहरी स्तम्भ के एकपञ्चमांश अर्थात् ५ हाथ का पांच भाग एक हाथ अग्निकोण से प्रारंभ कर प्रदक्षिणाक्रम से १२ स्तम्भों को जमीन में गाड़ना चाहिए। अन्दर के चार स्तम्भों को, ८ हाथ का पांचवां हिस्सा (१ह. १४अ. ३य. १यू.) जमीन में गाड़ना चाहिए, इस प्रकार १६ स्तम्भ सिद्ध होता है।। १९–२०।।

स्तम्भेषु तिर्यग्वलिका निधेयाश्चूडासु कर्णेष्वथवा बहिस्ताः।
पूर्वापरं दक्षिणसौम्यदिक्स्थं कोणेऽन्तरा काष्ठचयं निदध्यात्।। २१।।

सावित्री– बलिकारोपणविधिः। प्रथमं तावत् षोडशस्तम्भानां कृते षोडशसमबलिकाः पूर्व–पश्चिम–उत्तर–दक्षिणदिक्षु प्रदेयाः। यथा– बहिर्स्तम्भानां संयोजकत्वेन द्वादशसमबलिकाः, चतुरन्तर्स्तम्भानां संयोजकत्वेन चतुस्समबलिकाः स्थापनीयाः। एवं बहिस्थचतुर्कोणेषु चत्वारः कर्णबलिकाः तथैव चतुरन्तर्कर्णबलिकाः। चतुर्षु दिक्षु अष्ट तिर्यग्बलिकाः प्रदेयाः। तासां चतुरन्तर्कर्णबलिकानां यत् मिलनस्थानं जायते

तदैव शिखरप्रदेश। एवं प्रकारेण षोडशबलिकाः भवन्ति। एवं स्तम्भानां, समबलिकानां तिर्यग्बलिकानां च संख्या (१६ + १६+ १६= ४८) अष्टचत्वारिंशत् भवति।

शब्दविशेषार्थः— (१) सौम्यदिक्— उत्तरदिक्। (२) काष्ठचयं— काष्ठसमूहः।

बलिका रोपण विधि कहते हैं। पहले सोलह (१६) खम्भों के लिए सोलह समबलिकाएं पूर्व,पश्चिम,उत्तर और दक्षिण दिशाओं में तथा अन्दर के चारों कोने में दें। बाहरी खम्भों को जोड़ने के लिए बारह (१२) समबलिकाएं दें। अन्दर के चारों खम्भों को जोड़ने के लिए चार समबलिकाएं दें। चारों दिशाओं में दो—दो तिर्यग्बलिका अर्थात् आठ बलिकाएं दें। उन चारों कोनों में स्थित बलिकाएं जहाँ मिलते हैं उसे शिखर प्रदेश कहते हैं। शिखर में अन्दर के चारों कोनों के लिए चार कर्ण बलिकाएं, तथा बाहर के चारों कोनों के लिए चार कर्ण बलिकाएं दें। इस प्रकार १६ खम्भें, १६ समबलिकाएं तथा १६ तिर्यक बलिकाओं को मिलाकर कुल ४८ संख्यक है।।२१।।

मध्यभागशिखरं रचयित्वा छादयेदपि कटैर्ऋजुवंशैः।
द्वारवर्जमिह मण्डपमेनं स्तम्भकानपि सुवस्त्रसमूहैः।। २२।।

सावित्री— मण्डपाऽऽच्छादनविधिः। मण्डपस्य शिखरं विरच्य तस्य द्वाराणि च विहाय समग्रमण्डपं कोमलकट—रज्जु—वंशादिभिराच्छादयेत्। सर्वान् स्तम्भान्नपि। मण्डपं दर्पण—चामर—घट—सुवस्त्रादिभिः विभूषयेत्। द्वारेषु पृथग्रूपेण ऋजुवंशैराच्छादनीयमिति केचन आचार्याः कथयन्ति। नारिकेलदलैर्वाऽपि पल्लवैर्वाऽपि वेणुभिः। आच्छाद्या मण्डपाः सर्वे द्वारवर्जन्तु सर्वतः।। वास्तुशास्त्रे— कटैः सद्भिस्तु सञ्छाद्यः विजयाद्यास्तु मण्डपाः। हयग्रीवपञ्चरात्रे— दर्पणैश्चामरैर्घटैः स्तम्भान् वस्त्रैर्विभूषयेदिति।।२२।।

शब्दविशेषार्थः— (१) द्वारवर्जम्— द्वाराणि विहाय। (२) सुवस्त्रसमूहैः— वस्त्रैर्दर्पणचामरघंटादिमंगलचिह्नैर्विभूषयेत्।

मण्डप का शिखर बना कर उसके द्वारों को छोंडकर पुरे मण्डप को कोमल पत्ते, फूस और बाँस इत्यादि से आच्छादित करें। हवा रोकने के लिए दरवाजों के लिए अलग से चटाई बनाकर लगाएं। मण्डप को दर्पण, चँवार और कलसों से सजाएं तथा खम्भों को सुन्दर कपडों से सुशोभित करें।

पूर्वादिदिक्षु रचयेदपि तोरणानि न्यग्रोधजन्तुफलपिप्पलवृक्षराजैः
अश्वत्थजन्तोफलपर्कटिभूरिपद्भिर्वैषामभावत इमान्यथवैकंकेन।। २३।।
हस्ताद्बहिर्मण्डपतः शराङ्गस्वरैः करैस्तान्यधमादिकेषु।
दीर्घाणि च प्राहुरथायतिः स्यात्तेषां द्विहस्ता चरणप्रवृद्ध्या।। २४।।

सावित्री– तोरणरचनाविधिः। 'देवास्तोरणरूपेण संस्थिताः यज्ञमण्डपे। विघ्नविध्वंसनार्थाय रक्षार्थमध्वरस्य च।।' इति पञ्चरात्रतंत्रस्मरणात्, देवानां निश्चयस्थितिमनुलक्ष्य (देवानामाविर्भावस्थानत्वेन) तोरणानि रचयेत्। तोरणरचना मण्डपद्वारादेकहस्ताद्बहिः कुर्यात्। एतदपि पूर्वादि क्रमेण रचयेत्। 'पूर्वदिशि न्यग्रोधो ऽश्वत्थो वा, दक्षिणदिश्युदुम्बरः, पश्चिमस्यामश्वत्थो पर्कटी वा उत्तरदिशि वटः' इत्येषां वृक्षकष्ठानां प्रयोगः करणीयः। कस्यचिदेकस्य अभावेन एक प्रकारेणैव काष्ठेन चतुर्तोरणानां निर्माणं कर्त्तव्यम्। अधम मण्डपस्य तोरणं लम्ब–प्रस्थक्रमेण ५ह./२ह. परिमितं कुर्यात्। मध्यममण्डपस्य तोरणं लम्ब–प्रस्थक्रमेण ६ह./२ह. ६अं. परिमितं कुर्यात्। उत्तम मण्डपस्य तोरणं लम्ब–प्रस्थक्रमेण ७ह./२ह. १२अं. परिमितं स्यात्। एतेषु तोरणेषु अधममध्यमोत्तमक्रमेण तेषां तोरणानां लम्बभागस्येकपञ्चमांश एकहस्तपरिमितं,एकहस्त–चतुरङ्गुलषडंगवपरिमितं चैकहस्त–चतुरङ्गुल –चतुर्यव–षड्यूकापरिमितं भूमौ निखनितव्यः।

कपिलपंचरात्रे – न्यसेन्न्यग्रोधमैन्द्र्यां तु याम्यां चौदुम्बरं तथा। वारुण्यां पिप्पलं चैव कौवेर्य्यां प्लक्षजं न्यसेत्।। अश्वत्थोदुम्बरप्लक्षवटशाखाकृतानि च। मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत्।।

शब्दविशेषार्थः–(१) जन्तुफलं– "उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः" इत्यमरः। (२) अश्वत्थो– 'वोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशन अश्वत्थ' इत्यमरः। (३) न्यग्रोधः– न्यग्रोधबहुपाद्वटः इत्यमरः। (४) शराङ्गस्वरैः– 'शर' इति पञ्च, अङ्गेति षट् 'स्वर' इति सप्त च। (५) पर्कटि– 'प्लक्षो जटी पर्कटी स्यात्', इत्यमरः। (६) भूरिपद्– न्यग्रोधः। भूरिपद्– बहुपादविशिष्टो वटवृक्षः।

मण्डप द्वार से एक हाथ बाहर पूर्वादि दिशाओं में तोरण द्वार बनाना चाहिए। अधम मण्डप में ५ हाथ लम्बा २ हाथ चौड़ा, मध्यम मण्डप में ६ हाथ लम्बा २ हा. ६ अं. चौड़ा तथा उत्तम मण्डप में ७ हाथ लम्बा और २ हा. १२ अं. चौड़ा तोरण लगायें। पूर्व में वट या पीपल, दक्षिण में गूलर का, पश्चिम में

पीपल या पाकर का, उत्तर में पाकर या वट का तोरण द्वार बनायें। यदि सब वृक्ष की लकड़ी न मिलें तो एक ही वृक्ष का चारों द्वार बनायें। मध्यमादि मण्डप में तोरण स्तम्भ गाड़ने की विधि अर्थात् खम्भे की पंचमांश गाड़ें। अधम मण्डप में ५ हाथ तोरण का पंचमांश १ हाथ, मध्यम मण्डप में ६ हाथ का पञ्चमांश १ हा. ४ अं. ६ य. तथा उत्तम मण्डप में ७ हाथ का पञ्चमांश १ हा. ९ अं. ५ य. जमीन में गाड़ना चाहिए।।२३–२४।।

स्तम्भार्धमानं फलकं तु तिर्यक् नवेशविश्वप्रमितांगुलाश्च।
तन्मूर्ध्नि कीलाः स्वतुरीयभागैस्ततस्तु शूलाकृतयश्च ते स्युः।। २५।।
तद्वेशनं द्वित्रियुगांगुलानि शैवे तु विष्णोर्यजनेऽङ्गुलर्द्धिः।
कीलेषु शङ्खारिगदाम्बुजाङ्केष्विष्वंशरोपः किल तोरणेषु।। २६।।

सावित्री– "तिर्यक् फलकमानं स्यात्स्तम्भानामर्द्धमानतः" इति शारदा तिलकस्मरणानुसारं; अधम–मध्यम–उत्तममण्डपेषु स्तंभार्धमानानि फलकानि भवन्ति। तानि च प्रान्तयोश्छिद्रेणयुतानि तोरणस्तम्भे निदध्यात्। अर्थात् अधमादिमण्डपेषु सार्द्धहस्तद्वय–हस्तत्रय–सार्द्धहस्तत्रयायामानि फलकानि भवन्ति। शिवयागे त्रिशूलाकृतिफलकानां स्वरूपमधमादिमण्डपक्रमेण नव– एकादश–त्रयोदशांगुलदीर्घाः, तत्तुरीयभागमर्थात् सपाद द्वय–पादोन त्रय– सपादत्रयांगुलविस्तारयुताः तोरणकीला अन्तः प्रवेशनार्थं लघुकीलेन समन्विता द्वि–त्रि–चतुरांगुलात्मिकाः स्युः। त्रिशूले मध्य शृंगं सरलं पार्श्वयोश्च किञ्चिद्वक्रं ज्ञेयम्। त्रिशूलं पूर्वादिक्रमेण चतुर्षु दिक्षु निदध्यात्। एतत्तु शिवयागे। "विष्णुयागे अंगुलर्द्धिः" अर्थात् अधमादिषु मण्डपेषु क्रमेण दश–द्वादश–चतुर्दशां गुलदीर्घाः, सार्द्धद्वय–त्रि–सार्द्धत्रयांगुला विस्तारयुता स्युः। पूर्वादिक्रमेण चतुर्षु दिक्षु शंख–चक्र–गदा–पद्माकाराः कीलास्तोरणफलकमध्ये निदध्यात्।अधममध्यमोत्तममण्डपेषु तेषामेकपंचमांशः (२अं.,२.।। अं, ३ अं.) निखनेत्।

पिङ्गलमते– शूलेन चिह्निताः कार्या द्वारशाखास्तु मस्तके। शूले नवांगुलैर्दैर्घ्ये तुरीयांशेन विस्तृतिः।। ऋतु वै मध्यशृङ्ग स्यात् किंचिद्वक्रं तु पक्षयोः। प्रथमं तत्समाख्यातं द्वयंगुला रोपयेत्तथा। शेषाणां द्वयंगुला वृद्धिर्वेशश्चांगुलिवृद्वितः। (वास्तुशास्त्रे) मस्तके द्वादशांशेन शङ्खंचक्रगदाम्बुजम्। प्रागादिक्रमयोगेन न्यसेत्तेषां त्वदारुणम्।।

शब्दविशेषार्थः– (१) ईश– एकादशः। (२) विश्व– त्रयोदशः। (३) तुरीयभाग–चतुर्थांशः

स्तम्भों के ऊपर स्तम्भों का आधा फलक तीन छिद्रवाला स्तम्भों के चूड़ में पहिनाना। उसका प्रमाण पाँच हाथ का आधा २.।। हाथ, ६ हाथ का आधा ३ हाथ, ७ हाथ का आधा ३.।। हाथ, इस प्रकार से अधम, मध्यम, उत्तम मण्डप में क्रम से जानना। उसके सिर के मध्य में कील देना। शिवयाग में त्रिशूल चारों दिशाओं में लगायें। यथा– अधम में ९ अं. लंबा २.। अं. चौड़ा, मध्यम में ११ अं. लंबा २.।। चौड़ा और उत्तम में १३ अं. लंबा ३.। अं. चौड़ा। अधमादि क्रमसे फलकों को २ अं. ,३अं. और ४ अं. गाडना। विष्णुयाग में अधमादि मण्डपों में क्रमसे १० अंगुल लम्बा २ अंगुल चौड़ा, १२ अंगुल लम्बा ३ अंगुल चौड़ा तथा १४ अंगुल लंबा ३ अं.चौडा शङ्ख, चक्र, गदा और पद्म आदि फलकों को पूर्वादि क्रम से लगायें। उसी क्रम से शङ्खादि कीलों का पञ्चमांश (२अं. , २.।। अं, ३ अं.) अधमादि मण्डपों में गाडें।

उद्यत्पत्रफलातिनम्रविलसद्रम्भाभिरालिङ्गितः
स्तम्भोऽनेदलैरसादलविटपैः सर्वत्र संवेष्टितः।
राजच्चामरसम्प्रबद्धमुकुरोदञ्चद्वितानान्वितो
युक्तः पुष्पफलैः फलाय भवतां भूयान्महामण्डपः।। २७।।

सावित्री– मण्डपसज्जीकरणं कथ्यते। नवपल्लव–फलयुतैः स्तम्भाग्रस्पर्शिभिः कदलीवृक्षैराम्रपल्लवमालैश्च षोडशस्तम्भन् सज्जीकृत्य मण्डपं वेष्टयेत्। पञ्चवर्णीवितानैः काचचामरपुष्पफलैः मण्डपं तथा सुसज्जयेत् यथा शोभायमानं स्यात्। एवं सज्जीकृतं महामण्डपं शुभफलप्रदं भवति।

सिद्धान्तशेखरे– चूतपल्लवमालादिवितानैरुपशोभितम्। विचित्र वस्त्रसंच्छन्नं पट्टकूलविभूषितम्। सफलैः कदलीस्तम्भैः क्रमुकैर्नारिकेलजैः। फलैर्नानाविधैर्भोज्यैर्दपणैश्चामरैरपि। भूषितं मण्डपं कुर्याद्रत्नपुष्प समुज्ज्वलम्।।२५–२६।।

शब्द विशेषार्थः– (१) रम्भा– कदलीवृक्षः। (२) वितान– विविधवर्णपटैः प्रस्तुतः, मण्डपस्योर्ध्वभागस्य शोभावर्धकः पटविशेषः "अस्त्रीवितानमुलोचः" इत्यमरः। (३) उद्यत्पत्र– नवपल्लवानि। (४) अनेदलैः – अनेकदलैः। (५) रसादलविटपैः– 'आम्रपत्रबाहुल्येन' इति। 'आम्रश्चूतरसालोऽसा सहकारेति सौरभः' इत्यमरः।

नये पत्तों तथा फल से युक्त केले के पेड़ द्वार के स्तम्भों में लगाएं जो स्तम्भ के अग्रभाग को स्पर्श करते हों। साथ में आम के पत्तों का बन्दनवार

बनाकर मण्डप को सजाएं। मण्डप में पञ्चरङ्गा चँदवा लगायें। सीसा, चँवर, पुष्प, फल आदि से महामण्डप को सुशोभित करें। इस प्रकार शोभायमान महामण्डप शुभफल प्रदान करता है।।२७।।

'ध्वजान् द्विहस्तायतिकांश्च पञ्चहस्तान् सुपीतारुणकृष्णनीलान्।
श्वेतासितश्वेतसितान् दिगीशवाहान् बहेद्दिक्करवंशशीर्षे।। २८।।

सावित्री– ध्वजनिरूपणम्। ध्वजाः त्रिकोणात्मकाः स्युः। ध्वजप्रमाणं द्विहस्तप्रस्थ–पञ्चहस्तलम्बपरिमितं स्यात्। ध्वजा दिशाऽधिपतिवाहनचिह्नैः चिह्निताः स्युः। दशहस्तपरिमिते वंशशीर्षे ध्वजाः संयोज्याः। तस्य च पंचमांशोऽर्धात् द्विहस्तपरिमितं भूमौ निखनेत्। पूर्वदिशि पीतध्वजः, अग्निकोणे रक्तवर्णध्वजः, दक्षिणे कृष्णध्वजः, नैर्ऋते नीलध्वजः, पश्चिमे शतेवध्वजः, कृष्णध्वजो वायवे, श्वेतो उत्तरदिशि, कृष्ण ध्वज ईशाने। सूत्रकारेण ऊर्ध्वोऽधः कृते वाहननाम न विहितम्। ऊर्ध्वे हंसः अधः गरूड चेति केचन। **दिशास्वामीनां वाहनानि**– पूर्वदिशादिक्रमेण दिशास्वामीनां वाहनानि ध्वज मध्ये अङ्कयेत् तद्यथा– हस्ती, मेषः, महिषः, सिंहः, मीनः, हरिणः, अश्वः वृषभश्च।

शब्दविशेषार्थः– (१) दिगीशवाहनान्– दिशाम् ईशः दिगीशः, तस्य वाहनः, दिगीशवाहनः तान्। (२) वंशशीर्षे– वंशस्य (कीचकस्य) अग्रभागे। (३) असितः– कृष्णः।

ध्वज स्वरूप का निरूपण करते हैं। २ हाथ चौड़ा ५ हाथ लम्बा दिशाओं के वाहन व रङ्ग से युक्त त्रिकोण ध्वजा को दस हाथ लम्बे बाँस के सिर पर लगायें। पीला ध्वज पूर्व में, लाल ध्वज अग्निकोण में, काला ध्वज दक्षिण में, नीला नैर्ऋत में, सफेद ध्वज पश्चिम में, कृष्ण ध्वज वायु कोण में, सफेद ध्वज उत्तर में, कृष्ण ध्वज ईशान में। दिशास्वामी के वाहन यथा– पूर्व के पीत ध्वज में हस्ती। अग्निकोण के रक्त ध्वज गें भेड़। दक्षिण के कृष्ण ध्वज में महिष। नैर्ऋत के नील ध्वज में सिंह । पश्चिम के सफेद ध्वज में मछली। वायु कोण के कृष्ण रङ्ग के ध्वज में हरिण। उत्तर के सफेद रङ्ग के ध्वज में घोड़ा। ईशान के कृष्ण ध्वज में बैल। कुछ आचार्यों के मत है कि– पूर्व ईशान के मध्य में सफेद वा लाल ध्वज में हंस पश्चिम नैर्ऋत ध्वज में गरुड। तथा ध्वजादण्ड (बाँस) की पाँचवाँ हिस्सा २ हाथ जमीन में गाड़ना चाहिए।।२८।।

लोकेशवर्णास्त्रयुताः पताकाः शैलेन्दुदैर्घ्यायतिकाँश्च मध्ये।
चित्रं ध्वजं दिक्करदैर्घ्यवंशत्रिदोस्ततं प्रान्तगकिङ्किणीकम्।। २९।।
श्वेतां च नवमीं पूर्वेशानयोर्मध्यतो बुधः।
विन्यसेत्तु पताकां च ध्वजांस्तानपि पूर्वतः।। ३०।।

सावित्री— दिक्पालानां शस्त्रसंस्थापनाय पताकानां स्थितिरुच्यते। पताकाः दिक्पालानां वर्णानुरूपाणां ध्वजानां वर्णाश्रिताः भवन्ति। सप्तहस्तदीर्घ—एकहस्तप्रस्थपरिमिताः पताकाः स्युः। तासु पताकासु पूर्वादिक्रमेण दिक्पालानां शस्त्राणि, यथा— वज्र—शक्ति—दण्ड—खड्ग— पाश—अंकुश—गदा—त्रिशूलानि अङ्कितानि स्युः। एता अपि दशहस्त परिमितवंशशीर्षे संयोज्याः। तस्य च पञ्चमांश (द्विहस्तपरिमितं) दिशा— विदिशासु भूमौ निखनेत्। दशदिशां स्थितावपि सूत्रकारेण अधरुर्ध्वयोः कृते पताकासंज्ञा न निरुपिता। ऊर्ध्वे कमण्डलुरधश्चक्र इति केचन।

महाध्वजः— महाध्वजो दशहस्तदीर्घः त्रिहस्तप्रस्थविशिष्टो भूयात्। अस्मिन् पञ्चवर्णात्मके ध्वजे वृषभो अंकनीयः। पताकान्तकोणे घण्टा नुपूरो वा संयोजयेत्। अस्य स्थानं पूर्व—ईशानयोर्मध्ये स्यात्। अस्य महाध्वजदंण्डस्य पंचमांशं भूमौ निखनेत्।

ध्वजदण्डस्तु कर्त्तव्यो द्वात्रिंशद्धस्तसम्मितः।। स्यादिन्द्रः करिवाहनः कुलिशभृत् प्राच्यां पिशङ्गद्युतिस्त्वाग्नेय्यामजवाहनोऽ जरुचिः शक्त्या युतो हव्यवाट्।। याम्यां दण्डकरो यमश्च महिषारुढोऽञ्जना भस्तथा।। नैऋत्यां करवालभृन्निऋतिजः सिंहादिरूढोऽसितः।। वारुण्यां झाषगो हिमद्युतिरपां नाथश्च पाशान्वितो वायव्यां मृगवाहनोऽङ्कुशकरो वायुः शुकाभः स्मृतः। कौवेर्य्यां नरवाहनो दिशि गदापाणिर्विचित्रस्तथा।। रौद्र्यां सद्वृषवाहनः शशिनिभः स्याच्छङ्कः शूलभूत। हंसस्थोऽरुणकः कमण्डलुकरः शक्रेशयोरन्तरानन्तोऽपांपतिरक्षसोर्घ्ननिभस्ताक्ष्यार्धि रुढोऽरिभृत्।। इति केचन ।।२९—३०।।

शब्दविशेषार्थः— (१) शैलेन्दुः— शैलाः सप्त, इन्दु एकः अर्थात् सप्तदशः । (२) दिक्कर— दशहस्त

दिशास्वामीध्वज का जो रङ्ग पूव में कह आये हैं वही रङ्ग पताका का करें। उसकी लम्बाई—चौड़ाई और शस्त्र कहते हैं। पताका १ हाथ चौड़ा ७ हाथ लम्बा, दिक्पाल के शस्त्र सहित होना चाहिए। यथा—पूर्व के पताका में वज्र,

अग्निकोण के पताका में शक्ति, दक्षिण के पताका में दण्ड, नैर्ऋत्य के पताका में खड्ग, पश्चिम के पताका में पाश, वायव्य के पताका में अङ्कुश, उत्तर के पताका में गदा, ईशान के पताका में त्रिशूल, पूर्वईशान् के मध्य पताका में कमण्डल और पश्चिम निर्ऋत के मध्य पताका में चक्र अंकित करें। दस हाथ के बाँस के सिर पर दिशा–विदिशा में स्थापन करें। बाँस का पाँचवाँ हिस्सा (पञ्चमांश २ हाथ) भूमि में गाड़ें। मण्डप पूर्व ईशान के बीच में एक पञ्चरङ्ग महाध्वज (दस हाथ लम्बा ३ हाथ चौड़ा) लगायें। महाध्वज में बैल अंकित करें। तथा कोने में घण्टी, घुँघरू और चँवर बांधकर पूर्व–ईशान के मध्य में लगायें।

प्राच्याश्चतुष्कोणभगेन्दुखण्डत्रिकोणवृत्ताङ्गभुजाम्बुजानि।
अष्टास्रिशक्रेश्वरयोऽस्तु मध्ये वेदास्रि वा वृत्तमुशन्ति कुण्डम्।। ३१।।

सावित्री– नवकुण्डीक्रमः कथ्यते। पूर्वदिशि चतुरस्रकुण्डं, अग्निकोणे योनिकुण्डं, दक्षिणे अर्धचन्द्रकुण्डं, नैर्ऋते त्यस्र कुण्डं, पश्चिमे वृत्तकुण्डं, वायव्ये षडस्रकुण्डं, उत्तरे पद्मकुण्डं, ईशाने अष्टास्रकुण्डं, ईशान–पूर्वयोर्मध्ये च वृत्तकुण्डं चतुरस्रकुण्डं वा स्यात्। शारदातिलके कुण्डनामानि–

चतुरस्रं योनिमर्द्धचन्द्रं त्र्यस्रं सुवर्त्तुलम्।
षडस्रं पंकजाकारमष्टास्रं तानि नामतः।।



प. नवकुण्डीचक्रम्

शब्दविशेषार्थः— (१) प्राच्या— पूर्व—आग्नेय—दक्षिणादिक्रमेण ईशानपर्यन्तम्। (२) वेदास्रि— चतुरस्र इति। (३) भगः— योनिः। (४) इन्दुखण्डः—अर्धचन्द्राकारः (५) वृत्ताङ्गः— वृत्तः गोलाकारः, अङ्गानि षट् अर्थात् षडस्र (६) अम्बुजानि— कमलानि। (७) शक्रेश्वरयोर्मध्ये—पूर्व—ईशानयोर्मध्ये।

नवकुण्डी में कुण्ड के क्रम। यथा पूर्व में चतुरस्र, अग्नि कोण में योनि, दक्षिण में अर्द्धचन्द्राकार, नैऋत में त्रिकोण, पश्चिम में वृत्तकुंड, वायव्य में षट्कोण, उत्तर में पद्म, ईशान में अष्टकोण और अष्टास्र चतुरस्र के बीच में चतुरस्र या वृत्त नामक नौवाँ आचार्यकुंड बनायें। यह नवकुंडी पक्ष है।।३१।।

आशेशकुण्डैरिह पञ्चकुण्डी चैकं यदा पश्चिमसोमशैवे।
वेद्याः सपादेन करेण यद्वा पादान्तरेणाऽखिलकुण्डसंस्था।। ३२।।

सावित्री— पंचकुण्डीचक्रम्। पूर्वे चतुरस्रं, दक्षिणे अर्धचन्द्राकारं, पश्चिमे वृत्ताकारम्, उत्तरे पद्मम्, ईशाने चतुरस्रं वृत्तं वा पञ्चमकुण्डं कुर्यात्। वेदीतः सपादैकहस्तान्तरेण पादान्तरेण वा कुण्डं भवेत्। इत्येवं प्रकारेण सकलकुण्डानां स्थितिः। यदि कुण्डमेकं भवतितर्हिपश्चिमे,उत्तरेऐशान्येवा कुर्यात्।



पञ्चकुण्डीचक्रम्

शब्दविशेषार्थः — (१) आशेशकुण्डैः— अष्टकुण्डेषु। (२) सोमशैवः— उत्तर—ईशानदिशौ। (३) सपादकरेण— एकहस्तषड्ङ्गुलमर्थात् त्रिंशदंगुलपरिमितमिति।

पञ्चकुंडीपक्ष कहते है—पूर्व में चतुरस्र, दक्षिण में अर्धचन्द्र, पश्चिम में वृत्त, उत्तर में पद्म, ईशान में चतुरस्र वा वृत्त बनायें। सब कुण्ड वेदी से सवा हाथ (अर्थात् ३० अंगुल) या ६ अंगुल से छोड़कर बनायें। अथवा मण्डप को नव कोष्ठ बनाकर उन कोष्ठों के मध्य में बनायें।

विप्राच्छुत्यस्रं च वृत्तं च वृत्तार्धं त्र्यस्रि स्याद् वेदकोणानि वापि।
सर्वाण्याहुर्वृत्तरूपाणि चान्ये योन्याकाराण्यङ्गनानां तु तानि।। ३३।।

सावित्री— वर्णभेदेन कुण्डभेदः। ब्राह्मणस्य कृते चतुरस्रकुण्डं, क्षत्रियस्य कृते वृत्ताकारकुण्डं, वैश्यस्य कृते अर्धचन्द्राकारकुण्डं च शूद्रस्य कृते त्रिकोणात्मककुण्डं भवेत्। अथवा चतुर्वर्णानां कृते वृत्तकुण्डं चतुरस्रकुण्डं वा निर्मियेत। यदि स्त्रीस्यात्तर्हि तस्याः कृते योनिकुण्डं चतुरस्रकुण्डं वा कुर्यात्। अर्थात् स्त्रियां यजमानायां कुण्डानि योन्याकाराणि कुर्युः।

शारदातिलके— विप्राणां चतुरस्रं स्याद्राज्ञां वर्त्तुलमिष्यते। वैश्यानामर्द्धचन्द्राभं शूद्राणां त्र्यस्रमीरितम्।।

शब्दविशेषार्थः— (१) विप्राच्छुत्यस्रं—विप्रात्, ब्राह्मण—क्षत्रिय—वैश्य—शूद्राः। श्रुति— वेदाश्चत्वारः, अस्रं— रेखा अर्थात् चतुर्वर्णानां कृते क्रमेण चत्वारि कुण्डानि भवन्ति। (२) त्र्यस्रि— त्रिकोणः। (३) अङ्गना— स्त्रीः।

नवकुण्डीचक्रम्

दिशा	कुण्डम्	फलम्	योन्यग्रम्	होतृमुखम्
प्राची	चतुरस्रं	सिद्धिप्रदं	दक्षिणे उदगग्रा	उत्तरमुखम्
आग्नेयी	योनिः	पुत्रप्रदं	योनिर्नास्ति	उत्तरमुखम्
दक्षिणा	अर्धचन्द्रं	शुभप्रदं	दक्षिणे उदगग्रा	उत्तरमुखम्
नैऋतिः	त्रिकोणं	शत्रुनाशं	पश्चिमे पूर्वाग्रा	पूर्वमुखम्
प्रतीची	वृत्तं	शान्तिप्रदं	पश्चिमे पूर्वाग्रा	पूर्वमुखम्
वायवी	षट्कोणं	मृत्यूच्छेदनं	पश्चिमे पूर्वाग्रा	पूर्वमुखम्
उदिची	पद्मं	वृष्टिप्रदं	पश्चिमे पूर्वाग्रा	पूर्वमुखम्
ऐशानी	अष्टास्रं	आरोग्यप्रदं	पश्चिमे पूर्वाग्रा	पूर्वमुखम्

पूर्वेशानयोर्मध्ये चतुरस्रं/वृत्तं सर्वसिद्धिप्रदं दक्षिणे उदगग्रा उत्तरमुखम् एककुण्डीपक्षे चतुरस्रं वृत्तं वा ऐशन्यां कुर्यात्।

वर्णभेद से कुण्डभेद यथा– ब्राह्मण के लिये चतुरस्र, क्षत्रिय के लिये वृत्त, वैश्य के लिये अर्धचन्द्र, शूद्र के लिये त्रिकोण अथवा चारों वर्णों के लिये वृत्त (गोल) या चतुरस्र (चौकोर) कुंड बनायें। यदि स्त्री यजमान हो तो योनि या चतुरस्र कुंड बनायें।।३३।।

सिद्धिः पुत्राः शुभं शत्रुनाशः शान्तिर्मृतच्छिदे।
वृष्टिरारोग्यमुक्तं हि फलं प्राच्यादिकुण्डके।। ३४।।

सावित्री– पूर्वदिशि चतुरस्रं सर्वकामनासिद्ध्यर्थं, अग्निकोणे योनिकुण्डं पुत्रकामनायां, दक्षिणे अर्धचन्द्रकुण्डं शुभकामनायां, शत्रुनाशाय नैर्ऋते त्र्यस्रकुण्डं, शान्तिकामनायां पश्चिमे वर्त्तुलकुण्डं, छेदनकामनायां वायव्ये षडस्रकुण्डं, मारणकामनायामुत्तरे पद्मकुण्डं, रोगशमनकामनायां वृष्टिकामनायां च ऐशान्ये अष्टास्रकुण्डं कर्त्तव्यम्। शारदातिलके– सर्वसिद्धिकरं कुण्डं चतुरस्रमुदाहृतम्। पुत्रप्रदं योनिकुण्डमर्धेन्द्वाभं शुभप्रदम्। शत्रुक्षयकरं त्र्यस्रं वर्त्तुलं शान्तिकर्मणि। छेदमारणयोः षष्ठं षडस्रं पद्मसन्निभम्। वृष्टिदं रोगशमनं कुण्डमष्टा– स्रमीरितम्।।३४।।

शब्दविशेषार्थः– (१) शान्तिर्मृतिच्छिद्– शान्तिः, मृतिः मरणं, च्छिद् छेदनम्। (२) प्राच्यादि– प्राची प्रभृति।

चतुरस्र आदि कुण्डों के फल कहते हैं। चतुरस्र कुण्ड सिद्धिकामना के लिये, योनिकुण्ड पुत्रकामना के लिये, अर्धचन्द्र शुभकामना के लिये, त्रिकोण शत्रुनाश के लिये, वृत्तकुण्ड शान्ति के लिये, षट्कोण मृत्यु और छेदन के लिये, पद्मकुण्ड वृष्टि के लिए और आरोग्यता के लिए अष्ट्रास्र कुण्ड में हवन करना चाहिए।

शतार्धे रत्निः स्याच्छतपरिमितेऽरत्निवितते
सहस्रे हस्तं स्यादयुतहवने हस्तयुगलम्।
चतुर्हस्तं लक्षे प्रयुतहवने षट्करमितं
ककुब्भिर्या कोटौ नृपकरमपि प्राहुरपरे।। ३५।।

सावित्री – आहुतिपरिमाणेन कुण्डप्रमाणम्। पञ्चाशदाहुतिषु (शतार्द्धे=५०) रत्निपरिमितं , शताहुतिषु (१००) अरत्निपरिमतं (द्वाविंशांगुलं चतुर्यवपरिमितं), सहस्राहुतिषु (१०००) एकहस्तपरिमितं, अयूताहुतिषु (१०,०००) द्विहस्त– परिमितं, एकलक्षाहुतिषु

चतुर्हस्तपरिमितं, प्रयूताहुतिषु (१०,०००००) षड्हस्तपरिमितं च कोट्याहुतिषु (१०००००००) दशकरपरिमितं अष्टकरपरिमितं वा गभीरं कुण्डं भवति। आचार्याणां मतानुसारेण कोट्याहुतिषु नृपकर अर्थात् षोडशकरपरिमितं गभीरं कुण्डं भवति। *शारदातिलके* – खाताधिके भवेद्रोगी हीने धेनुक्षयस्तथा। वक्त्रकुण्डे च सन्तापो मरणं छिन्नमेखले।। मेखलारहिते शोकोऽभ्यधिके वित्तसंक्षयः। भार्याविनाशनं प्रोक्तं कुण्डे योन्या विना कृते ।। कुंड यत्कण्ठरहितं सुतानां तन्मृतिप्रदम्। अनामिके मृत्यूपैति बन्धुस्तथैव मानाधिके स्वयं चेति।।

शब्दविशेषार्थः– (१) रत्निः– बद्धमुष्टिकरो रत्निः, (कहुनी से छोटी ऊँगली के जड तक के विस्तार को रत्नि कहते हैं।) (२) अरत्निः–अरत्निः प्रसूताङ्गुलिः। 'कहुनी' इत्यारभ्य कनिष्ठिकाग्रपर्यन्त यो विस्तारः सोऽरत्नीः। (३) विततम्– गभीरता/ विस्तृतिः (४) ककुद्भिः–दश अष्ट वा, ते च पूर्वपश्चिमोत्तरदक्षिणैशान्य-वायव्यनैर्ऋत्याग्न्यूर्ध्वाधा इति। (५) नृपकरः– षोडशहस्तः (१६)

आहुति संख्या के अनुसार कुण्ड की गभीरता कहते हैं। ५० आहुति में रत्निमात्र का, १०० आहुति में अरत्निमात्र २२ अं० ४ यव का, १००० आहुति में १ हाथ का, १०,००० आ० में २ हाथ का, १०,०००० आहुति में ४ हाथ ४८ अं० का, १०,००००० आ० में ६ हाथ, १००००००० आहुति में १० या ८ हाथ का कुंड बनाना चाहिए।। ३५।।

लक्षैकवृद्ध्या दशलक्षकान्तं करैकवृद्ध्या दशहस्तकं च।
कोट्यर्धदिग्विंशतिलक्षलक्षदले मुनिष्ववर्तु कृशानुहस्तम्।। ३६।।

सावित्री – पश्चान्तरे हवनसंख्यानुसारं कुण्डस्य गभीरता कथ्यते। एक लक्षाहुतिषु एकहस्तपरिमिता कुण्डस्य गभीरता भवति। अनेन प्रकारेण यावल्लक्षमुत्तरोत्तरो वृद्धिः स्यात् तावदेकहस्तोत्तरोत्तरो वृद्धिर्भवति। एवं दशलक्षपर्यन्तं भवति। अर्द्धकोटौ (५०,००००० सप्तहस्तपरिमिता त्रिंशल्लक्षाहुतिषु (३०,०००००) षड्हस्तपरिमता, लक्षाहुतिषु (१,००००० त्रिहस्तपरिमिता कुण्डस्य गभीरता भवति।

शारदातिलके– एकहस्तमितं कुण्डं लक्षहोमे विधीयते।। लक्षाणां शतकं यावत्तावद्धस्तेन वर्द्धयेत्। *सिद्धान्तशेखरे* तु लक्षार्धे द्विकरं कुण्डं लक्षहोमे चतुष्करम्।। कुण्डं पञ्चकरं प्रोक्तं दशलक्षाहुतौ क्रमात्।। षट्हस्तं लक्षविंशत्यां कोट्यर्धे हस्तसप्तकमिति।।

भविष्यपुराणे– मुष्टिमानं शतार्द्धे तु शते चाऽरत्निमानकम्। सहस्रे त्वथ होतव्ये कुण्डं कुर्यात् करात्मकम्। द्विहस्तमयुते तच्च लक्षहोमे चतुष्करम्।। दशलक्षमिते होते षट्करं संप्रचक्षते।। अष्टहस्तात्मकं कुण्डं कोटिहोमेषु नाधिकम्।।

शब्दविशेषार्थः– (१) दिग्विंशति– दिक् दशः, विंशतिः, अम्मिल्य– त्रिंशत् (३०)। (२) मुनिष्वर्त्तु– मुनयः सप्त, ऋतवः षट्। (३) कृशानुः– अग्निः त्रयः

आहुति संख्या के अनुसार कुण्डविस्तार कहते हैं। १०,०००० आहुति में १ हाथ का, इसी प्रकार एक–एक लक्ष की वृद्धि में एक–एक हाथ की वृद्धि होती है। यह दस हाथ तक सीमित होता है। यथा– १लाख में १ हाथ, २ लाख में २ हाथ इसीप्रकार क्रम से १० लाख में १० हाथ कुण्ड की गभीरता होगी। विशेष रूप से ५० लाख आहुति में ७ हाथ का, ३० लाख में ६ हाथ का, १ लाख में ३ हाथ का कुण्ड बनाना चाहिए यह सूत्रकार का मत है।।३६।।

वेदाक्षीणि युगाग्नयः शशियुगान्यष्टाब्धयस्त्रीषवो
ऽष्टाक्षा बह्निरसाः स्वराङ्गकमिता नेत्रर्षयोऽक्षस्वराः।
अङ्गुल्योऽथ यवाः खमभ्रमिषवः खं पञ्चषट् सागराः
सप्ताभ्रं मुनयस्त्वमी निगदिता वेदास्रके बाहवः।। ३७।।

सावित्री– कुण्डानां बाहुमानम्। कुण्डानि तावत् एकहस्तादारभ्य दशहस्तपरिमितानि भवन्ति। एषु हस्तादिपरिमितेषु कुण्डेषु बाहुः कियत्परिमितं स्यादिति सूत्रयति। तद्यथा क्रमेण एकहस्तपरिमिते कुण्डे वेदाक्षीणि अर्थात् २४अं. ० य., द्विहस्ते परिमिते युगाग्नयः, अभ्र अर्थात् ३४ अं. ० य., त्रिहस्तपरिमिते शशियुगान्, इषव, अर्थात् ४१ अं० ५ य., चतुर्हस्तपरिमिते अष्टाब्धयः, ख, अर्थात् ४८ अं. ० यं. , पञ्चहस्तपरिमिते त्रीषवः, त्रि पञ्च, अर्थात् ५३ अं. ५ य., षड्हस्तपरिमिते अष्टाक्षा ,षट्, अर्थात् ५८ अं. ६ य. सप्तहस्तपरिमिते बह्निरसाः, सागराः, अर्थात् ६३ अं. ४ यं. अष्टहस्तपरिमिते स्वराङ्गकमिता, सप्त, अर्थात् ६७ अं. ७ य., नवहस्तपरिमिते नेत्रर्षयो, अभ्रः, अर्थात् ७२ अं. ० य., दशहस्तपरिमिते कुण्डे अक्षस्वरार्मुनयः, अर्थात् ७५ अं. ७ य. बाहुमानं कुर्यात्।

शब्दार्थविशेषः– (१) वेदाक्षीणि– वेदाश्चत्वारः (४) अक्षीणि दौ (२) अर्थात् २४। *अङ्कानां वामतो गतिरिति सर्वत्र अन्वितव्यम्।* (२) युगाग्नयः – चतुर्युगाः (४), अग्नयः त्रयः (३) अर्थात् ३४। (३) शशियुगानि– शशि एकः (१), युगानि चत्वारि (४) अर्थात् ४१ (४) अष्टाब्धयः– अब्धयश्चत्वारः (४), अष्ट

(८) अर्थात् ४८ (५) त्रीषवो– इषवः पञ्च (५), त्रि (३) अर्थात् ५३। (६) अष्टाक्ष– अक्षेति पञ्च (५), अष्ट (८) अर्थात् ५८।

स्थूलभूजमानचक्रम्

१	२	३	४	५	६	७	८	९	१० ह.
२४	३४	४१	४८	५३	५८	६३	६७	७२	७५ अं.
०	०	५	०	५	६	४	७	०	७ यवः

५७६ ११५२ १७२८ २३०४ ३४५६ ४०३३ ५१८४ ५१६० क्षेत्रफलम् स्थूलरूपेण।

१ हाथ से लेकर १० हाथ के कुण्ड का भूजमान और क्षेत्रफल (स्थूलरूप से) कहते हैं। एक हाथ के कुण्ड में २४ अ., दो हाथ के कुण्ड में ३४ अं०, ३ हाथ के कुण्ड में ४१ अं. ५ यव, चार हाथ के कुण्ड में ४८ अङ्गुल, पाँच हाथ के कुण्ड में ५३ अंगुल ५ यव, छह हाथ के कुण्ड में ५८ अंगुल ६ यव, सात हाथ के कुण्ड में ६३ अंगुल ४ यव,आठ हाथ के कुंड में ६७ अंगुल ७ यव, नौ हाथ के कुण्ड में ७२ अंगुल और दस हाथ के कुण्ड में ७५ अंगुल ७ यव चौड़ाई लम्बाई होती है। अब १ हाथ से १० हाथ तक चतुरस्र कुण्ड के भुज का क्षेत्रफल स्थूलरूप से कहते हैं– स्थूल भुजमान से कहीं–कहीं क्षेत्रफल से विरोध पड़ता है। जैसे दो हाथ में भुज ३४ अंगुल है। उसको ३४ से गुणा करने पर ११५६ अं. होता है। परन्तु एक हाथ के क्षेत्र का क्षेत्रफल (२४ अं.) को २४ अं. से गुणा करने से ५७६ अं. हुआ। इस क्षेत्रफल को २ से गुणा करने से २ हाथ के क्षेत्रफल ११५२ अं. होता है। इसी क्रमसे ३ से गुणा करने से तीन हाथ का १७२८ अं., ४ हाथ का क्षेत्रफल २३०४ अं., ५ हाथ का क्षेत्रफल २८८० अं., ६ हाथ का क्षेत्रफल ३४५६ अं., ७ हाथ का क्षेत्रफल ४०३२ अं., ८ हाथ का ४६०८ अं., ९ हाथ का ५१८४ अं., १० हाथ का ५७६० अं. इस प्रकार क्षेत्रफल ठीक करना चाहिए क्योंकि न्यूनाधिक होने से दोष होता है।।३७।।

कुण्डत्रयी दक्षिणयोनिरैन्द्र्याः सौम्याग्रका स्यादितराणि पञ्च।
पञ्चाब्धगानीन्द्रदिगग्रकाणि योनिर्न कोणे न च योनिकुण्डे।। ३८।।

सावित्री– कुण्डेषु योनिस्थानम्। प्राच्यां चतुरस्रकुण्डे योन्यग्रमुत्तरं प्रति, दक्षिणे नापि। अन्येषु कुण्डपञ्चकेषु योन्यग्रं प्राङ्मुखं भवति। **योनिर्नकोणे न च योनिकुण्डमिति**

स्मरणात् आग्नेय्यां स्थिते योनिकुण्डे न योनिर्जायते। अन्येषु नैर्ऋतादिपञ्चकुण्डेषु योनिः पूर्वाग्रं भवति। नवमे आचार्ये कुण्डे योन्यग्रं पूर्वमुत्तरं प्रति वा स्यात्।

स्वायम्भुवे– प्राणाग्नियाम्यकुण्डानां प्रोक्ता योनिरुदङ्मुखी।। पूर्वामुखाः स्थिताः शेषा यथाशोभं व्यवस्थितम्।। *त्रैलोक्यसारे*– नवमस्यापि कुण्डस्य योनिर्दक्षदले स्थिता।। नाऽर्पयेत्कुण्डकोणेषु योनि तां तन्त्रवित्तमः। योनिकुंडे तथा योनि पद्मे नाभिर्विवर्जयेत्।।३८।।

शब्दविशेषार्थः– (१) कुण्डत्रयी– चतुरस्रं, योन्याकारम् अर्धचन्द्रं च। (२) ऐन्द्र्याः– पूर्व–आग्नेय–दक्षिणदिशः। (३) सौम्याग्रका– उत्तराग्रकाः। (४) भगः– योनिः।

कुंडों में योनि लगाने का क्रम कहते हैं। पूर्वादि क्रम से पूर्व, दक्षिण इन दो कुंडों में योनि दक्षिण में लगायें। उसका अग्रभाग उत्तर को करें। नैर्ऋत्य, पश्चिम, वायव्य, उत्तर और ईशान इन पाँच कुंडों में योनि पश्चिम में लगायें। इसका अग्र भाग पूर्व को करें। यह सब कुण्ड दिशा–विदिशा के हुए और नौवाँ आचार्य कुण्ड पूर्व ईशान के मध्य में है उसमें दक्षिण या उत्तर को योनि का अग्र करें। योनि कुण्ड में योनि नहीं बनाना चाहिए।।३८।।

द्विघ्नव्यासं तुर्यचिह्नं सपाशं सूत्रं शङ्कौ पश्चिमे पूर्वगेऽपि।
दत्वा कर्षेत्कोणयोः पाशतुर्ये स्यादेवं वा वेदकोणं समानम्।। ३९।।

सावित्री– समचतुरस्रसाधनम्। व्यासप्रमाणं सूत्रं द्विगुणीकृत्य पाशाभ्यां सह चतुर्धा विभज्य पूर्वपश्चिमशंकोः वध्नियात्। तस्य सूत्रस्य उभयचतुर्थांशमाग्नेय–नैर्ऋतदिशौ प्रति कर्षयेत्। तेनैव प्रकारेण वायव्य–ऐशान्यदिशौ प्रति कर्षयेत्। अनेन प्रकारेण समचतुरस्रक्षेत्रं सिद्धं भवति।



चतुरस्रसाधनम्



शब्दविशेषार्थः– (१) द्विघ्न– द्विगुणीतं व्यासम्। (२) तुर्यचिह्नं– चतुर्थांशे चिह्नानि कर्त्तव्यानि। (३) कर्षयेत्कोणयोः– आग्नेय–नैर्ऋत्यकोणयोः, ऐशान्यवायव्यकोणयोः कर्षयेदिति। (४) पाशतुर्ये– पाशचतुष्टये। (५) वेद कोणं– चतुष्कोणम्।

व्यास १ हाथ उसको दूना करने से २ हाथ होगा। इसी प्रकार से जितना व्यास हो उसका दूना करें। उसमें पाश सहित सूत्र के ४ चिह्न करें। दोनों पाशों को पूर्व और पश्चिम की कील में फँसाकर दोनों की चतुर्थांश गाँठ को पकड़कर अग्नि तथा नैर्ऋत्य कोण की तरफ खीचें और वायव्य तथा ईशान कोण की तरफ खीचें तो चतुरस्र कुंड बराबर सिद्ध होता है। इसी प्रकार सब कुंडों के पहले चतुरस्र क्षेत्र बना लें तब उसके ऊपर दूसरा कुण्ड बनायें,क्योंकि चतुरस्र सब कुण्डों की मूलरूप ही है।।३६।।

क्षेत्रे जिनांशे पुरतः शरांशान् संवर्ध्य च स्वीयरदांशयुक्तान्।
कर्णाग्निमानेन लिखेन्दुखण्डं प्रत्यंकुरोऽङ्कात्गुणतो भगाभम्।। ४०।।

सावित्री– योनिकुण्डनिर्माणोपायः। प्रकृतिक्षेत्रं चतुर्विंशभागेन विभज्य, पंचमांशं च गृहणीयात्। पञ्चमांशस्य द्वात्रिंशद्भागं कृत्वा, पंचमांशेन साकं च संमिल्य (५ अ. १ यवः, २यूके) चतुरस्रस्य ईशान–आग्नेयोर्मध्यविन्दोः विन्दुतः पूर्वं प्रति सम्वर्द्धयेत्। येन चतुरस्रस्य मध्यविन्दुतः पूर्वं प्रति १७ अ. १ य. २ यू. परिमितं भवेत्। ततः चतुरस्रस्य मध्यबिन्दुतः नैर्ऋत–वायव्ययोः कर्णयोर्मध्ये परकालं स्थापयित्वा वृत्तार्धद्वयमङ्कयेत्। पूर्वसम्बर्धितविन्दो नैर्ऋत–वायव्यकोणाभ्यां सह संयोजनेन योनिकुण्डं सिद्ध्यति।



योनिकुण्डम्



शब्दविशेषार्थः— (१) शरांशान्— पञ्चमांशान्। (२) रदांशः— द्वात्रिंशां शः। (३) कर्णाग्रिमानेन— कर्णस्य एकचतुर्थांशेन (एकपादेन)। (४) इन्दुखण्डं— अर्धवृत्ताकारम्। (५) प्रत्यंकुरोऽङ्काद्गुणतो— वर्द्धितपार्श्वयोः। (६) भगाभम्— योन्याकृतिः।

प्रकृतिक्षेत्र के २४ भाग के ५ भाग के साथ उसका (५ भाग का) ३२वां हिस्सा जोड़ने से ५ अं. १ यव २ यूका हुआ। इतने को प्रकृतिक्षेत्र के पूर्व में ऐशान्य (अर्थात् ईशान और आग्नेय के बीच में आगे बढ़ाऐं) चतुरस्र में चारों कोण से रेखा देकर कर्णाग्रि (दोनों के मध्य) में परकाल रखकर दो आर्धवृत्त करें और दोनों पार्श्व से आगे के चिह्न से रेखा देने पर शुद्ध योनिकुण्ड होता है।।४०।।

शरशतांशयुतेषु भागहीनः स्वधरित्रीमितकर्कटेन मध्यात्।
कृतवृत्तदलेऽग्रतश्च जीवां विदधात्विन्दुदलस्य साधुसिद्ध्यैः।। ४१।।

सावित्री— अर्धचन्द्रस्वरूपम्। प्रकृतिक्षेत्रं पञ्चधा विभज्य (४ अं./६ य./३ यू./१ लि./५बा.) तेन स्व—शतांशेन संयुज्य (शतांशः ०य./३ यू./०लि./४बा.) ४अं/६य./६यू/२लि./९बा. प्रकृतिक्षेत्रात् वियुज्येत। तेन अवशेषः १९ अं.१य. १यू. ५लि. ४ बालाग्रः स्यात्। एतत्परिमितं व्यासार्धं नीत्वा चतुरस्रस्य केन्द्रे परकालं संस्थाप्य अर्धवृत्ताकारं क्षेत्रमङ्कयेत्। ततः केन्द्रस्पर्शिनीं पूर्वापरायतां सरलरेखां पूर्वाऽपरा परिधिप्राप्तं यावत् रचयित्वा उदगार्द्धं परिमार्जयेत्। अनेन अर्धचन्द्रस्वरूपं सिद्धं भवति।



अर्द्धचन्द्राकारकुण्डम्


विशमशडस्रसाधनम्

शब्दविशेषार्थः—(१) शरशतांशः— प्रकृतिक्षेत्रस्य 'शर' इति पञ्चमांशः, तस्य शतांशः। (२) स्वधरित्रीमितकर्कटेन— स्वपरिमिता भूमि धरित्री, कर्कटेन परकालेन। (३)जीवां— स्वरूपं/क्षेत्रं/शरीरमिति (द्रुमभेदे शरी— रिणी ः ति हैमः)। (४) इन्दुदलस्य— अर्द्धचन्द्रस्य

प्रकृतिक्षेत्र २४ अं. का एकपञ्चमांश (४ अं./६ य./३ य./१ लि. /५बा.) लें, तथा उस पञ्चमांश का सौवें हिस्से (शतांश= ३ यू./४बा.) को उसमें (पञ्चमांश में) मिलाकर, (४ अं. ६ य. ६ यू. २ लि. १ बा.) उसे २४ अं. से घटाने से १९ अं. १ य. १यू. ५ लि. ४ बा.होता है। इस नाप के व्यासार्द्ध से चतुरस्र के मध्य में अर्द्धवृत्त अंकन करें, तथा पूर्व और पश्चिम परिसीमा को सरलरेखा से जोडकर उत्तरार्ध को मिटाने से अर्धचंद्र सिद्ध होता है।। ४१।।

वह्वयंशं पुरतो निधाय च पुनः श्रोण्योश्चतुर्थांशकम्।
चिह्नेषु त्रिषु सूत्रदानत इदं स्यात्त्र्यस्रिकष्टोज्झितम्।। ४२।।

सावित्री— त्र्यस्रकुण्डसाधनम्। आदौ प्रकृतिक्षेत्रं चतुर्विंशतिभागेन विभज्य तस्य त्र्यंशमष्टांगुलपरिमितं चतुरस्रस्य पुरतो वर्धयेत्। प्रकृतिक्षेत्रस्य चतुर्थांशं षडंगुलपरिमितं श्रोण्योर्नैर्ऋत—वायव्यदिशोः, नैर्ऋते दक्षिणं प्रति वायव्ये उत्तरं प्रति परिवर्धयेत्। ततो विन्दुत्रयाणां संयोजनेन शुद्धं त्रिकोणं सिद्ध्यति।

त्यस्रसाधनम्

शब्दविशेषार्थः— (१) वह्वयंशं— प्रकृतिक्षेत्रस्य त्रिभागमिति, अर्थात् २४÷३ अं. = ८ अं.। (२) श्रोण्योः— वेद्याः नैर्ऋत—वायव्यकोणौ श्रोणी, तयोः।
(३) त्र्यस्रिः— त्रिकोणः।

त्र्यस्रसाधन— प्रकृतिक्षेत्र का एक तृतीयांश अर्थात् २४ ÷३ = ८ अं. नाप लेकर प्रकृतिक्षेत्र के पूर्व के मध्यविन्दु से आगे चिह्न दें। चतुरस्र के उत्तर—पश्चिम

कोण से उत्तर की ओर तथा दक्षिण–पश्चिम कोण से दक्षिण की ओर प्रकृतिक्षेत्र के एकचतुर्थांश (२४÷४ = ६ अं.) आगे बढ़ाकर चिह्न दें। तीनों चिह्नों को जोड़ने से त्रिकोणकुण्ड सिद्ध होता है।

विश्वांशैः स्वजिनांशकेन सहितैः क्षेत्रे जिनांशे कृते
व्यासार्धेन मितेन मण्डलमिदं स्याद् वृत्तसंज्ञं शुभम्।। ४३।।

वृत्तकुण्डसाधनम्– प्रकृतिक्षेत्रं चतुर्विंशधा विभज्य विश्वांशं (त्रयोदशांशं १३/२४ अं.) नीत्वा तस्य पुनः चतुर्विंशभागं कृत्वा (१३÷२४= य.४/यू.२/लि. ५/बा.२) तं च विश्वांशैः संयोजयेत् (अं.१३/य.४/यू.२/लि.५/बा.२)। एतत्परिमाणेन व्यासार्द्धेन चतुरस्रस्य केन्द्रे (परकालं स्थापयित्वा) वृत्तनिर्माणेन शुद्धवृत्तकुण्डं सिद्ध्यति।



वृत्तकुण्डसाधनम्



शब्दविशेषार्थः– (१) विश्वांशैः– १३ अंशैः (त्रयोदशांशैः)। (२) जिनांशकेन– प्रकृतिक्षेत्रस्य चतुर्विंशतिभागेन।

वृत्तकुण्ड साधन। प्रकृतिक्षेत्र के २४ भाग से १३ अंगुल लें। उस १३ अंगुल के साथ उसके चौबीसवें हिस्से को १३ ÷ २४ = ४ यू. ५ लि. २ बा. मिलाकर (१३ अं. ४ यं. २ यू. ५ लि. २ बा.) मध्य में परकाल रखकर नरप को व्यासार्द्ध लेकर (वृत्त बनाने से शुद्ध वृत्तकुण्ड सिद्ध होता है।।४२।।

भक्ते क्षेत्रे जिनार्शेर्धृतिमितलवकैः स्वाक्षिशैलांशयुक्तै
र्व्यासार्द्धान्मण्डले तन्मितधृतगुणके कर्कटे चेन्दुदिक्तः।
षट्चिह्नेषु प्रदद्याद्रसमितगुणकानेकमेकं तु हित्वा
नाशे सन्ध्यर्तुदोषामपि च वृत्तिकृतेर्नेत्ररम्यं षडस्रम्।। ४४।।

सावित्री– विषमषट्कोणसिद्धिः। वायव्यकोणे षट्कोणकुण्डं भवति। प्रकृतिक्षेत्रस्य चतुर्विंशभागात् अष्टादशभागं (१८ अं.) गृहणीयात्। तस्य (अष्टादशांगुलस्य) द्विसप्ततिभागः द्वियवा (२ य.) भवति। तं अष्टादशांगुलेन संमिल्य, अर्थात् अष्टादशांगुलद्वियवपरिमितेन व्यासार्द्धेन वृत्तं रचयेत्। वृत्तस्य परिसीमां षड्धा विभज्य तदुपरि (वृत्तपरिसीमामुपरि) षट्चिह्नानि अङ्कयेत्। एकं–एकं चिह्नं विहाय चिह्नानाभुपरि सूत्रं पातयेत्। सन्धिचिह्नानि च विसर्जयेत्। तेन विषमषडस्रस्य सिद्धिर्भवति।



प्रकृतिक्षेत्रम् (२४ अं)



शब्दविशेषार्थः– (१) जिनांशं– प्रकृतिक्षेत्रं। (२) धृतिः– अष्टादशः। (३) स्वाक्षिशैलांशः– अक्षि इति द्विः(२), शैलांश इति सप्त(७) एवं संमिल्य द्विसप्ततिः (७२)। (४) कर्कटे– परकाले। (५) चेन्दुदिक्तः– उत्तरदिशातः। (६) रसमितगुणकानेकमेकम्– रस इति षट्_षट् चिह्नान्युपरि एकैकविन्दुं परित्यज्य परस्परं प्रति तृतीयं विन्दुं संयोजयेत्।

वायव्य कोण में विषम षट्कोणकुण्ड सिद्धि बताते हैं। प्रकृतिक्षेत्र २४ अंगुल से १८ अंगुल लेकर उसके साथ अठारह अंगुल का ७२ वाँ हिस्सा, अर्थात् २ यव जोड़ने पर १८ अं. २ य. हुआ। इस नाप के व्यासार्द्ध से वृत्त बनाकर उसकी परिसीमा के ऊपर उत्तर तरफ से ६ चिह्न करना। एक–एक चिह्न को छोड़कर तीसरे चिह्न पर सूत्र देने से और सब सन्धि की रेखा मिटाने से षट्कोण सिद्ध होता है।।४४।।

अथवा जिनभक्तकुण्डमानात्तिथिभागैः स्वखभूपभागहीनैः।
मितकर्कटोद्भवे तु वृत्ते विधुदिक्त समषड्भुजैः षडस्रम्।। ४५।।

सावित्री– समभुजषडस्रकुण्डस्य स्वरूपम्। प्रकृतिक्षेत्रं चतुर्विंशतिभागं कुर्यात्,

तस्य तिथिभागं (पञ्चदशभागं) गृहीत्वा तस्य च षष्ट्यधिकैकशत– भागं (६यूका) कुर्यात्। ततः (पञ्चदशभागात्) षड्यूकां वियुज्य (१५अं.–६यू. = १४अ./७य./२यू.) तत्परिमितेन व्यासार्द्धेन परकालेन वृत्तं अङ्कयेत्। वृत्तस्य परिसीमामुपरि उत्तरदिक्तः षट्समपरिमितानि चिह्नानि कुर्यात्। परस्परं संयोज्य संवृत्तिचिह्नानि विसर्जयेत्। अनेन समभुजषडस्रकुण्डं सिद्ध्यति।



शब्दविशेषार्थः– (१) तिथिभागः– पञ्चदशभागः। (२) खभूपभागः– 'ख' इति शून्यं, 'भूपभागः' इति षोडशभाग एवं १६० (षष्ट्यधिकैकशतम्)।

(३) विधुदिक्तः– उत्तरदिशातः।

समभुज षडस्रकुण्ड– प्रकृतिक्षेत्र के २४ भग से १५ भाग लेकर उसके १६० भाग करें। अर्थात् अं.१५–१५ अं. ÷ १६० = १४ अं. ७ य. २ यू. होता है। इस परिमाण के व्यासार्द्ध से वृत्त बनाकर उसकी परिसीमा पर उत्तर दिशा से समान दूरता विशिष्ट छहः चिह्न दें। ६ चिह्नों से परस्पर सूत्र देने और संवृत्ति मिटाने से समभुज षडस्रकुण्ड सिद्ध होता है।।४५।।

अष्टांशाच्च यतश्च वृत्तशरके तत्रादिमं कर्णिका
युग्मे षोडशकेसराणि चरमे स्वाष्टात्रिभागोनिते।।
भक्ते षोडशधा शरान्तरधृते स्युः कर्कटेऽष्टौ छदाः
सर्वां तां खनकर्णिकां त्यज निजायामोच्चकां स्यात्कजम्।। ४६।।

सावित्री– पद्मंकुण्डसिद्धिः। प्रकृतिक्षेत्रस्य अष्टमांशमर्थात् त्र्यंगुलपरिमत व्यासार्द्धादारभ्य उत्तरोत्तरक्रमेण त्र्यंगुलपरिमितं वर्द्धयन् पञ्चवृत्तानि अङ्कयेत्। अर्थात् त्र्यंगुलव्यासार्द्धविशिष्टं प्रथमवृत्तं कनिकास्थानीयमान्तरं कृत्वा तद्विगुणेन षडंगुलपरिमितेन व्यासार्द्धेन ततो बहिः केशरस्थानीयं द्वितीयवृत्तं, नवांगुलपरिमितेन पत्रमध्यस्थानीयं तृतीयं वृत्तं, द्वादशांगुलपरिमितेन व्यासार्द्धेन पत्रोपान्तस्थानीयं चतुर्थं वृत्तं, प्रकृतिक्षेत्रस्य अष्टमांशस्य यस्त्र्यंगुलात्मकस्तस्याष्टात्रिंशंत्तमांशेन उनितेन चतुर्दशांगुलसप्तयवद्वियूका–सप्तलिक्षापञ्चवलाग्रपरिमितेन व्यासार्द्धेन पञ्चमवृत्तमवध्याख्यं पत्राग्रस्था नीयमंकयेत्। (३ अं. ÷ ३८ = ० अं./० य./ ५ यू./ ० लि./ ३ वा.) वियुज्य अर्थात् (३ अं. –० अं./० य./ ५ यू./० लि./३ बा. =२ अं./७ य./२ यू./७ लि./५ बा) अर्थात् प्रथमवृत्तस्य व्यासार्द्ध ३ अं. द्वितीयस्य ६ अं., तृतीयस्य ९ अं., चतुर्थस्य १२ अं., पञ्चमस्य १४अं. ७ य. २ यू. ७ लि. ५ ब.। चतुर्थवृत्तं वृत्तकेन्द्रतः सोम्येन चतुर्थवृत्तव्यासार्द्धसूत्राण्यष्टौ दत्वा रेखांकनेन अष्टपत्राणि भवन्ति। चरमे षोडशकेशराणि कुर्याद्यथा– अन्तिमे वृत्ते समानरूपेण षोडशस्थानेषु चिह्नानि कुर्यात्। सर्वेषु दिग्विदिक्चिह्नान्तरालचिह्नेषु शंकुं संस्थाप्य निखनेत्। तेनैव षोडश केशराणि सम्पद्यन्ते। प्रथमवृत्तयुग्मं विहाय तृतीयवृत्ततः परिसीमामुपरि षोडशचिह्नानि दिशाविदिशासु कुर्यात्। प्रत्येकं चिह्नमपरपञ्चमचिह्नं प्रति पूर्व–दक्षिणक्रमेण च पूर्वोत्तरक्रमेणचिह्नकरणेन अष्टदलानि अङ्कितानि भवन्ति। एतदंकनं प्रत्येकवृत्तमुपरि कुर्यात्। दलानां मध्यविन्दुं केसरं च विहाय कर्णिकानां मध्ये खननेन स्वच्छपद्मकुण्डस्य निर्माणं भवति।



शब्दविशेषार्थः— (१) अष्टांशाच्च— चतुरस्रस्य अंष्टाशः, (२) वृत्तशरके—पञ्चवृत्तम्।, (३) स्वष्टात्रिभागो—अष्टत्रिंशद्भाग। (४) कजम्—पद्मकुण्डम्।

प्रकृतिक्षेत्र २४ के अष्टमांश से एक—एक वृत्त में अष्टमांश बढ़ा—बढ़ा कर ५ वृत्त करें। परन्तु पाँचवें वृत्त में वह अष्टमांश अपने ३८ वें हिस्से से हीन करके उस अष्टमांश के व्यासार्ध से २ अं० ७ यव २ यू० १ लिक्षा २ बालाग्र से पाँचवाँ वृत्त करे। कर्णिका नाम से पहला वृत्त ३ अंगुल, दूसरा वृत्त ६ अंगुल, पत्रमध्य नाम का तीसरा वृत्त ९ अंगुल, चौथा वृत्त, पत्राग्र नाम का १२ अंगुल तथा पाँचवां वृत्त का व्यासार्थ १४ अ. ७ य, २ यू. ७ लि.५ बलाग्र पाँचवाँ वृत्त में १६ चिह्न करें। दिशा—विदिशा तथा विदिशा—दिशा के बीच में पाँचवें चिह्न पर परकाल रखकर दिशा—विदिशा में ८ पत्र बनायें, और पत्र के मध्य तथा केसर को छोड़कर कर्णिका के मध्य स्थल को खोदने से स्वच्छ
पद्मकुण्ड सिद्ध होता है।।४६।।

क्षेत्रे जिनांशे गजचन्द्रभागैः स्वाष्टाक्षिभागेन युतैस्तु वृत्ते।
विदिग्दिशोरन्तरतोऽष्टसूत्रैस्तृतीययुक्तैरिदमष्टकोणम्।। ४७।।

सावित्री— विषमाष्टास्रकुण्डस्वरूपम्। प्रकृतिक्षेत्रस्य चतुर्विंशतिभागात् अष्टादशांशेन साकं तस्य (अष्टादशांशस्य) अष्टाविंशतिभागं (५ य. १ यू. १ लि. १ बा.) संमिल्य १८ अं. ५ य. २ यू. १ लि. १ बा. व्यासार्द्धेन वृत्तमङ्कयेत्। वृत्तस्य दिशा—विदिशासु अष्टचिह्नानि देयानि। एकैकं चिह्नं विहाय प्ररस्परं प्रति तृतीयचिह्नं द्वितीयस्य केन्द्रत्वं स्वीकृत्य रेखावर्द्धनेन वृत्तसन्धिविसर्जनेन च विषमाष्टास्रकुण्डं सिद्धयति।







विषमाष्टास्रकुण्डस्वरूपम्

शब्दविशेषार्थः— (१) गजचन्द्रभागैः— गजाः अष्ट, चन्द्र एकः, अर्थात् अष्टादशः(१८)। (२) स्वष्टाक्षिभागेन— अष्ट, अक्षि— द्विः, अर्थात् अष्टाविंशतिभागेन (२८)।

प्रकृतिक्षेत्र के १८ भाग के साथ उसके (१८ भाग के) २८वें हिस्से को जोड़कर अर्थात् १८ + १८ ÷ २८ = १८अं. ५ य. १ यू. १ लि. १ बा. परिमाण का व्यासार्द्ध लें। इस परिमाण के व्यासार्द्ध से वृत्त बनाकर उसके दिशा—विदिशाओं के मध्य में चिह्न दें। परस्पर प्रति तृतीय चिह्नों को मिलाकर तथा संवृत्तियों को मिटाने से मृदङ्गाकार शुद्ध सम अष्टास्रकुण्ड सिद्ध होता है।।४७।।

मध्ये गुणे वेदयमैर्विभक्ते शक्रैर्निजर्ष्यब्धिलवेन युक्तैः।
वृत्तकृतदिग्विदिशोऽन्तराले गजैर्भुजैःस्यादथवाऽष्टकोणम्।। ४८।।

सावित्री— समाष्टास्रमृदङ्गाकारं कुण्डस्वरूपम्। प्रकृतिक्षेत्रस्य चतुर्दशांशं (अर्थात् १४ अं.) गृहीत्वा तस्य सप्तचत्वारिंशभागं च तेन संमिल्य अर्थात् १४ अं. + १४ ÷ ४७ = १४ अं. २ य. ३ यू. विशिष्टेन व्यासार्द्धेन वृत्तमङ्कयेत्। दिशा—विदिशासु अष्टचिह्नानि कृत्वा क्रमेण परस्परचिह्नानि संयोज्य सूत्रप्रदानेन संवृतिमार्जनेन समाष्टास्रमृदङ्गाकारं कुण्डं सिद्ध्यति।

प्रकृतिक्षेत्रम् (२४ अं)



समाष्टास्रमृदंगाकारकुण्डम्



समाष्टास्रमृदंगाकारकुण्डम्

शब्दविशेषार्थः— (१) वेदयमैः— वेदाश्चत्वारः(४), यमः(१),अर्थात् १४। (२) शक्रैः— चतुर्दशैः(१४)। (३) निजर्ष्यब्धिलवेन— निज+ ऋषिः = ऋषयः सप्त (७), अब्धयश्चत्वारः (४) अर्थात् सप्तचत्वारिंशत् ४७। (४) गजैः — गजा अष्ट (८); अष्टदिगजाः।

खाातं क्षेत्रसमं प्राहुरन्ये तु मेखलां विना।
कण्ठो जिनांशमानः स्यादर्कांश इति चापरे।। ४८।।

सावित्री— कुण्डखातमानं सिद्ध्यति। कुण्डमानं (अर्थात् कुण्डस्य गभीरता, लम्बपस्थौ च) चतुर्विंशत्यंगुलपरिमितं स्यात्। अपरेषां मतेन मेखलां विना अर्थात् नवांगुलमेखलां विहाय पञ्चदशांगुलपरिमिते क्षेत्रे खातं कुर्यात्। अनेन खातमानं १५ अंगुलं, तदुपरि मेखलात्रयं ३ग३ = ९ अंगुलं संमिल्य च चतुर्विंशत्यंगुलपरिमितं कुण्डखातमानं सिद्ध्यति। तस्य कुण्डस्य कण्ठः' जिनांशमानं २४÷२४ अंशं (अर्थात् १ अंगुलपरिमितं) भवति। केषांचित् मते तु कण्ठः १२ अंगुलपरिमितं कुर्यात्।

सिद्धान्तशेखरे— खातं कुण्डप्रमाणं स्यादूर्ध्वे मेखलया सह।।; *प्रतिष्ठासारसंग्रहे—* पञ्चत्रिमेखलोच्छ्रायं ज्ञात्वा शेषमधः खनेत्।। *मोहशूलोत्तरे—* हस्तमात्रं खनेत्तिर्यगूर्ध्वं में खलया सहेति ।। *शारदातिलके—* यावन्कुण्डस्य विस्तारः खननं तावदीरितम्।। *सोमशम्भौ—* बहिरेकांगुलः कण्ठो ह्यङ्गुलः क्वचिदागमे, इति।

शब्दविशेषार्थः— (१) क्षेत्रसमं— समबाहुविशिष्टं क्षेत्रम् (प्रकृतिक्षेत्रसममिति) अर्थात् चतुर्विंशत्यंगुलपरिमितम्। (२) अर्कांशः— द्वादशसूर्याः/ द्वादशांगुलं ग्राह्यम्। (३) मेखला— मेखला सत्वरजस्तमोभेदेन त्रिधा। अत्र तु एका मेखला त्र्यंगुलपरिमिता।

सम्पूर्ण कुण्डों का खात कुण्डमान के बराबर कुण्डाकृति अर्थात् १ हाथ का कुण्ड हो तो लम्बाई—चौड़ाई और खात सब एक हाथ करें। (अर्थात् २४ अङ्गुल चौड़ा २४ अङ्गुला लम्बा २४ अङ्गुल गहरा बनायें) कुछ आचार्यों का मत है कि मेखलो को छोड़कर १५ अङ्गुल खात और कण्ठ १ अङ्गुल चौड़ा रखे। अन्य आचार्यों के मत में कण्ठ २ अङ्गुल चौड़ा करें।।४८।।

अधमा मेखलैका स्यान्मध्यमं मेखलाद्वयम्।
श्रेष्ठास्तिस्रोऽथवा द्वित्रिपञ्चस्वधमतादिकम्।। ४९।।

सावित्री— कुण्डस्य मेखलामानम्। मेखला अधममध्यमोत्तमभेदेन त्रिधा। अधममेखला एकांगुलपरिमिता, मध्यमा द्वे चोत्तमा त्र्यंगुलपरिमिता स्युः। अधमा अंगुलद्वयपरिमिता, मध्यमा त्र्यंगुलपरिमिता, उत्तमा पञ्चांगुलपरिमिता वा स्यादिति केचन। वर्णभदेनापि मेखलाभेदो जायते। *सोमशम्भुपद्धतौ* — त्रिमेखलं द्विजे कुण्डं क्षत्रियस्य द्विमेखलम्। मेखलैकं तु वैश्यस्य। *क्रियासारे* — नाभियोनिसमायुक्तं कुण्डं श्रेष्ठ त्रिमेखलम्। कुण्डं द्विमेखलं मध्यं नीचं स्यादेकमेखलम्।। *लक्षणसंग्रहे*— मुख्यास्तु पञ्च ताः प्रोक्ता मध्यमास्तिस्र एव च। द्वे स्यातां मध्यमे पक्षे एका स्यात्त्वधमाधमे।।

शब्दविशेषार्थः— (१) स्वधमादिकम्— आदि इति मध्यमोत्तमौ।

मेखला निर्णय। खात से बाहर १ अंगुल या २ अंगुल कंठ को छोड़कर अधमादि मेखला बनायें। १ मेखला अधमपक्ष, २ मेखला मध्यमपक्ष और ३ मखला उत्तमपक्ष है। परन्तु २ मेखला अधम, ३ मेखला मध्यम और ५ मेखला उत्तम, यह पक्ष सर्वमान्य है। १ मेखला अधमाधम पक्ष है। कुछ आचार्यों का मत ऐसा भी है कि तीन मेखला ब्राह्मण की और २ मेखला क्षत्रिय को, १ मेखला वैश्य को रखना चाहिए।।४९।।

अष्टधा विहितकुण्डशरांशैः सङ्गुनेद्भुवमुपर्यनलांशैः।
मेखला विरंचयेदपि तिस्रः षड्गजार्कलवविस्तृतपिण्डाः।। ५०।।

सावित्री— मेखलारचनाविधिः। कुण्डं त्रिमेखलं भवति, सत्वरजस्तमो भेदात्। प्रकृतिक्षेत्रम् अष्टधा विभज्य शरभागेन गुणीकृत्य (२४÷८X३ पंचगुणितेन १५ अं.), कुण्डस्यान्तः खातमानं कुर्यात्। क्षेत्रमुपरि नलांशैर्नाम त्र्यंशै— र्मेखलात्रयं कुर्यात्।

येन मेखलोच्चता नवांगुलं भवति। एवं प्रकारेण खातं पञ्चदशांगुलं, मेखला नवांगुलं संमिश्र्य चतुर्विंशत्यंगुलं खातमानं सिद्ध्यति। सत्व–रज–तमो भेदात् षड्गजार्कविस्तृतपिण्डा मेखलानां विस्तारः। अर्थात् सत्त्वमेखला प्रकृतिक्षेत्रस्य षडंशं २४÷६=४ अं. परमिता, रजोमेखला गजांशं २४÷८=३ अं. परिमिता च तमोमेखला अर्कांशं २४÷१२=२ अं. परिमिता प्रस्थोच्चविशिष्टा स्युः। *विश्वकर्मा*– व्यासाखातकरः प्रोक्तो निम्नं तिथ्यंगुलेन तु। कण्ठात्परं मेखला तु उन्नता सा नवांगुलेः। *क्रियासारे*– प्रधानमेखलोत्सेधमुक्तञ्चात्र नवांगुलम्।।

तद्बाह्यमेखलोत्सेधं पञ्चांगुलमिति स्मृतम्। तद्बाह्यमेखलोत्सेधमंगुल द्वितयं क्रमात्।। चतुस्त्रिद्वयंगुलव्यासो मेखलात्रितयस्य तु।। *योगिनीहृदये*– मेखला श्रृणु मे देवि! हस्तादिषु विशेषतः। षण्नागाङ्कशिवसम्भागैर्मिताः स्युर्गोपिताः शुभाः ।

शब्दविशेषार्थः– (१) शरांशः– पञ्चभागः (पञ्चांगुलं)। (२) अनलांशः– भागत्रयः (त्र्यंगुलं)। (३) षड्गजार्क– षड्, 'गज' इति अष्ट, अर्केति द्वादशः।

प्रकृति क्षेत्र के आठवें को पांच गुणा करके (२४÷८=३X५ से गुणा करने से =१५ अं.) १५ अंगुल अन्तखात बनायें। जमीन के ऊपर ३ भाग अर्थात् ३ अंगुल की ३ मेखला करे। अथवा प्रथम मेखला कुण्ड का छठवाँ हिस्सा ४ अंगुल ऊँची ४ अंगुल चौड़ी, दूसरी मेखला कुण्ड का आठवाँ हिस्सा ३ अंगुल ऊँची ३ अंगुल चौड़ी और तीसरी मेखला कुण्ड का बारहवाँ हिस्सा २ अंगुल उँचा २ अंगुल चौड़ा होना चाहिए।।५०।।

रसांशकादुन्नतविस्तृताश्च तिस्रोऽथवैका युगभागतुल्या।
पञ्चाऽथवा षट्शरवेदरामद्व्यंशैस्तताः स्युर्नवभागपिण्डाः।। ५१।।

सावित्री– मेखलासंख्या भिन्ने मेखलामानभिन्नता। एका मेखला चेत्, तन्मानं प्रकृतिक्षेत्रस्य युगभागोऽर्थात् चतुर्भागः (२४÷४ = ६ अं.) षडंगुलं प्रस्थोच्चते स्याताम्। त्रिमेखलाप्रसंगे तन्मानं प्रकृतिक्षेत्रस्य षडंशं (२४÷६ = ४ अं.) चतुरंगुलपरिमितं प्रस्थोच्चते स्याताम्। मेखलात्रयमिलनेन द्वादशांगुलपरिमितः समानचतुरंगुलविशिष्टः प्रस्थोच्चते जायेते। परन्तु पञ्चमेखलाप्रसंगे तु क्रमेण षट्–पञ्च–चतुः– त्रि–द्वयंगुलपरिमिता मेखलाः स्युः। संमिल्य प्रस्थो विंशत्यंगुलपरिमितः चोच्चता नवांगुला भवति। तद्यथा आद्यापरास्तच्छर भागहीना।

शब्दविशेषार्थः– (१) युगभागतुल्या–चतुर्भागः (२४÷४ = ६ अं.)। (२) रसांशः– षट्भागः (२४÷६ = ४ अं.)। (३) शरवेदरामद्वि–'शर' पञ्च, 'वेद' चतुः, 'राम' त्रि, द्वि।

एक मेखला करने की विधि। क्षेत्र का एक चतुर्थांश अर्थात् २४ ÷ ४ = ६ अंगुल ऊँची ६ अंगुल चौड़ी मेखला करें। दूसरी विधि से समान तीन मेखलाओं की ऊँचाई और चौड़ाई ४ अं. होने से कुल १२ अंगुल ऊँची १२ अंगल चौड़ी मेखला हुई। पाँच मेखला करें तो पहिली मेखला ६ अंगुल, दूसरी मेखला ५ अंगुल, तीसरी मेखला ४ अंगुल, चौथी मेखला ३ अंगुल, पाँचवीं मेखला २ अंगुल चौड़ी कुल चौड़ाई २० अंगुल और ऊँचाई ९ अंगुल है (प्रत्येक मेखला की ऊँचाई उसकी चौड़ाई की एक पञ्चमांश लेने से यह कुल ९ अंगुल ऊँची होती है)।।५१।।

आद्यापरास्तच्छरभागहीना जिनांशकण्ठाद्बहिरेव सर्वाः।
कुण्डानुकारा अपि मेखलाः स्युरर्काङ्गभागाच्च ततस्तु नाभिः।। ५२।।

सावित्री– एकहस्तपरिमिते कुण्डे पञ्चमेखलामानम्। पञ्चमेखलानां समष्टिगतोच्चता नवांगुलम्। तस्य नवांगुलस्य एकपञ्चमांशः (१ अ. ६ य. ३ यू. १ लि. ५ बा.) प्रत्येकमेखलात अपरां प्रति उच्चता स्यात्। अनेन सर्वं संमिल्य मेखलानामुच्चता नवांगुलं स्यात्। मेखला प्रकृतिक्षेत्रात् एकांगुलपरिमितकण्ठात् बहिरेव कुर्यात्। एकहस्तपरिमिते कुण्डे नाभिस्तु जिनांशस्य अर्कभागमर्थात् द्वयंगुलोच्चता, अंगभागमर्थात् चतुरंगुलप्रस्थ– विशिष्टा भवति। हस्तपरिमिते वृद्धौ कुण्डस्य पूर्वनिर्णितनाभिप्रमाणे यवद्वयवृद्धिः कुर्यादिति केचन।

शब्दविशेषार्थः– (१) आद्यापराः– पञ्चमेखलात्मकं कुण्डमिति ज्ञेयम्। (२) शरभागः– एकपञ्चमांशः। (३) जिनांशः– प्रकृतिक्षेत्रस्यैकांश अर्थात् एकांगुलः। (४) अर्काङ्गभागात्– द्वादशार्काः, अर्थात् द्वादशभागात् (अंगुल– द्वयपरिमितम्); अंगः– षड्भागः अर्थात् चतुरंगुलपरिमितम्।

मेखला की ऊँचाई कहते हैं। एक हाथ वाले कुण्ड के पांचों मेखलाओं का परिमाण पांचों मेखलाओं की कुल उच्चता नौ अंगुल होता है। एक मेखला से दूसरी मेखला की उच्चता नौ अंगुल का पांचवां हिस्सा अर्थात् ९ ÷ ५ = १ अंगुल ६ य. ३ यू. १लि. ५ बा. होती है। मेखला एकांगुल परिमित कण्ठ को छोड़कर प्रकृतिक्षेत्र से बाहर बनाया जाता है। एक हाथवाले कुण्ड में नाभी की उच्चता अर्कभाग अर्थात् २ अंगुल तथा प्रस्थ अंगभाग अर्थात् ४ अंगुल होता है। कुछ आचार्यों के मत में कुण्डमान एक हाथ बढ़ने से नाभि भी दो यव बढ़ जाती है।।५२।।

पुस्तकालय
विभाग
शान्ति कुंज, हरिद्वार

कुण्डाकारो नाभिरम्भोजसाम्यो वाब्जेयं नेनांशहानिर्दलाग्रे।
शेषक्षेत्रे वह्निवृत्तैः समेतैः स्युर्वै कर्णी केसराः पत्रकाणि।। ५३।।

सावित्री– कुण्डे नाभिरचनाविधिः। कुण्डाकृतिः कमलाकृतिर्वा नाभिः स्यात्। अर्थात् एकहस्तपरिमितचतुरस्रस्य नाभिः द्वयंगुलोच्चता चतुरंगुलप्रस्थविशिष्टा(२/४ अं.) स्यात्। प्रशस्थनाभिरचनाकामः चतुरस्रक्षेत्रं वृत्ताकारेण त्रिधा विभज्य वृत्तत्रयं कुर्यात्। प्रथमद्वितीयतृतीयवृत्तानि क्रमेण चतुः–अष्ट– द्वादशांगुलव्यासार्द्धविशिष्टानि भवन्ति। पूर्वकथनानुसारं वृत्तानामुच्चता द्वंगुलपरिमिता स्यात्। प्रथमवृत्ते अष्टदलं द्वयंगुलविस्तृतं स्यात्। शेषवृत्तद्वये कर्णिकाकेसरपत्रकाणि समानसंख्यकेन कुर्यात्। योनिकुण्डे तथा योनिं पद्मे नाभिं विवर्जयेदिति स्मरणानुसारं पद्मकुण्डे नाभिर्न कार्या। केवलं कर्णिका कुर्यात्।

शब्दविशेषार्थः– (१) अंभोजसाम्या– अंभः जलम्, तज्जातः पद्मः तत् सम। (२) अब्जेयं – अब्जः पद्मः (इयं)। (३) नेनांशः– द्वयांशः। (४) हानिः– विस्तारः। (५) दलः– अष्टदलः। (६) वह्निवृत्तैः– वृत्तत्रिभिः। नाभि रचना विधि। नाभि कुण्ड या कमलाकृति होता है। अर्थात् एक हस्त परिमित चतुरस्र की नाभि की उच्चता और प्रस्थ २/४ अंगुल होता है। उत्तम नाभि रचना करने के लिए चतुरस्र को वृत्तों से समान तीन भाग करें। अर्थात् प्रथम, द्वितीय और तृतीय वृत्त का व्यासार्द्ध क्रम से ४ अं., ८ अं., और १२ अंगुल होगा। प्रत्येक वृत्त की उच्चता दो अंगुल होगा। केन्द्र वृत्त में २ अं. चौड़ी पंखुड़ी वाला अष्टदल पद्म बनायें। बाकी दोनों वृत्तों में समान संख्यक कलियां, केसर और पत्तियाँ बनायें। (योनि कुण्ड में योनि तथा पद्मकुण्ड में नाभि बनाना वर्जित है।)।।५३।।

योनिर्व्यासार्द्धदीर्घा विततिगुणलवदायताब्धिद्विभाग
तुङ्गा तावत्समन्तात्परिधिरुपरिणा तावदग्रेण रम्या।
निम्नं कुण्डं विशन्ति वलयदलयुतेनान्विताऽधो विशाला
मूलात्सच्छिद्रनालान्तरवटरुचिराऽश्वत्थपत्राकृतिः सा।। ५४।।

सावित्री– कुण्डेषु योनि निर्माणम्। योनिर्व्यासार्द्धदीर्घा अर्थात् १२ अं. स्यात्। तस्या विस्तारो अष्टांगुलं स्यात् उच्चता द्वादशांगुलञ्च। योन्याकारं

वटपत्राकृतिरश्वत्थपत्राकृतिर्वा भवति। कुण्डस्य मेखलातो योनिः अग्रभागं प्रति निम्ना कर्त्तव्या। तदग्रं क्रमशः संकुचितं भूत्वां एकांगुलपरिमितेन व्यासविशिष्टनालेन संयुक्तं भवेत्।

वायवीये– मेखलामध्यतः कुर्यात् पश्चिमे दक्षिणेऽपि वा।। शोभनां मध्वतः किञ्चिन्निम्नामुन्मीलि। शनैरिति।। त्रैलोक्यसारे दीर्घा सूर्यांगुला योनिस्त्र्यंशेता विस्तारेण तु।। एकागुलोच्छ्रिता सा तु प्रविष्टाभ्यन्तरे तथा।। कुम्भद्वयार्ध संयुक्ता चाऽश्वत्थदल वन्मता।। अङ्गुष्ठमेखलायुक्ता मध्ये त्वाज्यधृतिक्षमेति।। *पञ्चरात्रे*– अकीगुलंच्छ्रितां योनि विदध्यात्तावदायतामिति। तावदीर्घा अकागुलोच्छ्रितामित्यस्य विवरणं। *शारदायाम्*– स्थलादारभ्य नालं स्याद्योन्यां मध्ये सरन्ध्रकम्।

शब्दविशेषार्थः– (१) व्यासार्द्धदीर्घा– व्यासस्य(प्रस्थस्य) अर्द्धं (१२अं.)। (२) विततिः– द्वादशः। (३) अब्धिद्विभागः– चतुरब्धयः, ४ × २ = ८ अं.। (४) सच्छिद्रा– च्छिद्रयुक्ता। (५) वटरुचिरा– वटपत्राकृतिः।

योनि का स्वरूप कहते हैं। योनि व्यास का आधा अर्थात् २४ अंगुल का आधा १२ अंगुल लम्बी ८ अंगुल चौड़ी १२ अंगुल ऊँची और नीचे से भारी ऊपर १ अंगुल संकुचित होना चाहिए। मूल सहित छिद्र का नाल १२ अंगुल ऊँचो और अग्रभाग १ अंगुल झुकती हुई अन्दर १ अंगुल कण्ठ के बाहर अग्र निकलती और मध्य में गड़हा १ अङ्गुल बनायें। मिट्टी का गोला २ दोनो पुष्ट पर रखे और १ अङ्गुल चौड़ी १ अङ्गुल ऊँची उसकी परिधि चारों तरफ रहे। यह अश्वत्य (पीपल) पत्राकृति योनि होती है। इसे सब कुण्डों के मध्य में लगाना चाहिए। ओर योनि के अग्र भाग के मध्य में छिद्र होना चाहिए।।५४।।

अथार्कांगुलपक्षे तु मेखलानां दशांगुलैः।
विस्तृतातिथिभिर्दीर्घांगुलिभिर्योनिरिष्यते।। ५५।।

सावित्री–यस्मिन् कुण्डे मेखलाः समाकाराः द्वादशांगुलपरिमिताः (४ ३ ३) भवन्ति तत्र योनिर्दशांगुल परिमितप्रस्थविशिष्टा, पञ्चदशांगुलदीर्घा, उच्चता च स्यात्। अन्यत् सर्वं पूर्ववदिति श्रेयम्।

शब्दविशेषार्थः– (१) अर्कः– द्वादशः। (२) तिथिः– पञ्चदशः

१२ अंगुल की तीनों मेखला समान चार—चार अंगुल की करनी हो तो योनि १० अंगुल चौड़ी १५ अङ्गुल लम्बी और १५ अंगुल ऊँची बनावे।। ५५।।

अथवापि मृदा सुवर्णमासा करमानं चतुरंगुलोच्चमल्पे।
हवने विदधीत वांगुलोच्चं विबुधः स्थण्डिलमेव वेदकोणम्।। ५६।।

सावित्री—स्थण्डिलप्रकारमुच्यते। कुण्डस्याभावे स्थण्डिलः कुर्यात्। सुवर्णवर्ण—मृत्तिकयामेकहस्तविशिष्टं चतुरस्रं निर्मितव्यम्। तस्योच्चता एकांगुलं चतुरंगुलं वा स्यात्। स्थण्डिलं कोणचतुष्टय युक्तं कुर्यात्।

सूतसंहितायाम्— स्थण्डिले मेखलाः कार्याः कुण्डो क्त स्थण्डिला—कृतिः।। योनिस्तत्र प्रकर्त्तव्या कुण्डवत्तत्र वेदिभिः। समेखलं स्थण्डिलं तु प्र शस्ते होमकर्मणि।। कण्ठं तु वर्जयेत्तत्र खाते कण्ठः प्रकीर्त्तितः।। *तन्त्रान्तरे*—मृदा सुवर्णया वापि सूक्ष्मवालुकयापि वा।। अंगुलोच्चं तथा वेदाङ्गुलोच्चं स्थण्डिलं विदुः। चतुष्कोणमुदक् प्राचौ एत्वमल्पाहुतौ शुभम्।। पञ्चाङ्गुलोच्चमथवा वस्वङ्गुलसमुन्नतमिति।। ५६।।

शब्दविशेषार्थः— (१) सुवर्णमासा— सुवर्णवर्णा मृत्तिका। (२) करमानं— चतुर्विंशत्यंगुलमिति ज्ञेयम्।

कुण्डाभावे स्थण्डिल का प्रकार कहते हैं। सुवर्ण जैसी मृत्तिका लेकर १ हाथ लम्बी १ हाथ चौड़ी ४ अंगुल ऊँची अथवा १ अंगुल ऊँची चौकोर वेदी बनायें। स्थण्डिल में भी योनि और मेखला का निर्माण करना किसी आचार्य का मत है।।५६।।

इति श्रीवृन्दावनदाशशर्मा कृतः कुण्डमण्डपसिद्धिरित्यस्य सावित्री

भाषानुवादः समाप्तः

ब्रह्मवर्चस शोध संस्थान
पुस्तकालय
शान्ति कुँज, हरिद्वार

हमारे द्वारा प्रकाशित महत्त्वपूर्ण ग्रन्थ

स्मृतियों का वातायन	डॉ० ज्योत्स्ना मोहन	मूल्य रू० ६००.००
शुक्लयजुर्वेदीय इष्टिप्रयोगः	प्रो० रमेशचन्द्र दाश शर्मा	मूल्य रू० २२५.००
महर्षिकात्यायनप्रणीतं यजुर्विधानसूत्रम्	प्रो० रमेशचन्द्र दाश शर्मा	मूल्य रू० २९५.००
भारतीय वास्तुविद्या के वैज्ञानिक आधार	डॉ० बिहारी लाल शर्मा	मूल्य रू० ३७५.००
शुक्लयजुर्वेदिय पार्वण श्राद्ध प्रयोग	प्रो० रमेशचन्द्र दाश शर्मा	मूल्य रू० ३५.००
कात्यायन शुल्वसूत्रम्	प्रो० रमेशचन्द्र दाश शर्मा	(यन्त्रस्थ)

मान्यता प्रकाशन

60 C, मायाकुंज, मायापुरी, नई दिल्ली-110064

ISBN 81-89149-06-7